# Contents


Contents i

## I ज्ञानश्रीमित्रनिबन्धावली ३

१ १ :॥ क्षणभङ्गाध्यायः ॥ ५
१.१ ॥ प्रथमः पादः—पक्षधर्माधिकारः ॥ . . . . . . ५
१.२ क्षणभङ्गाध्याये द्वितीयः पादः—अन्वयाधिकारः . . १४
१.३ क्षणभङ्गाध्याये तृतीयः पादः—व्यतिरेकाधिकारः . ६०
१.४ क्षणभङ्गाध्याये चतुर्थः पादः—अहेतुकविनाशाधिकारः १०३

२ २ ॥ व्याप्तिचर्चा ॥ १५३

३ ३ ॥ भेदाभेदपरीक्षा ॥ १६८

४ ४ ॥ अनुपलब्धिरहस्यम् ॥ १७१

५ ५ ॥ सर्वशब्दाभावचर्चा ॥ १७७

६ ६ ॥ अपोहप्रकरणम् ॥ १८४

७ ७ ॥ ईश्वरवादः ॥ २१०
७.१ ॥ पूर्वपक्षसंक्षेपः ॥ . . . . . . . . . . . . . २१०
७.२ ॥ ईश्वरवादाधिकारे संक्षेपदूषणम् ॥ . . . . . . २१८
७.३ ॥ वार्तिकसप्तश्लोकी ॥ . . . . . . . . . . . . २३५
७.४ ॥ ईश्वरवादाधिकारे वार्तिकसप्तश्लोकीव्याख्यानम् ॥ २३५

८ ८ ॥ कार्यकारणभावसिद्धिः ॥ २७८

९ ९ ॥ योगिनिर्णयप्रकरणम् ॥ २८३

१० १० ॥ अद्वैतबिन्दुप्रकरणम् ॥ ३०१

११ ११ ॥ साकारसिद्धिशास्त्रम् ॥ ३१९
११.१ प्रथमः परिच्छेदः . . . . . . . . . . . . . ३२०
११.२ द्वितीयः परिच्छेदः . . . . . . . . . . . . ३३६
११.३ तृतीयः परिच्छेदः . . . . . . . . . . . . . ३५८

वृत्तिविरहकृतं प्रादेशिकत्वं साध्यसिद्धेरीश्वराद्यनुमानवत् । एतेन निश्चितार्थक्रियाशक्तयो भावभेदाः धर्मिणोऽर्थक्रियासामर्थ्यसामान्यं हेतुरिति दर्शितम् । अथवा इमे प्रत्यक्षादिगोचराः सर्व एव भावा धर्मिणोऽर्थक्रियासामर्थ्यं हेतुः, तत्र प्रमाणाविषयस्य क्वचिदपि विधिसाधनानुमाने धर्मीकर्तुमशक्यत्वात्, प्रमाणविषये च सर्वत्रानुमानप्रवृत्तेः, का अपरा व्याप्तिः साध्यसिद्धेः ? प्रमाणगोचरतया धर्मिणो नाश्रयासिद्धिः साधनस्य । नापि स्वरूपासिद्धिः, यतो येषु तावदविवादेन बहिरर्थक्रियोपलम्भः, तेषु चिन्तैव नास्ति । येष्वपि न साक्षात् तदवधारणम्, तत्रापि प्रमाणजननादेवार्थक्रियासामर्थ्यव्यवस्थापनमनवद्यम् । अध्यक्षे साक्षादनुमाने च कार्ये पारम्पर्येणेति । § 7

अत्र केचिदाचक्षते—यत्कार्यकारिणः कारणस्य सामर्थ्यव्यवस्थापनं तस्यैव कथं सत्त्वसिद्धिः ? तदसिद्धौ मूलस्यापि नार्थसामर्थ्यम् । अथ यथाङ्कुरापेक्षया बीजस्य सामर्थ्यम्, तथा अङ्कुरस्यापि पत्रकाण्डाद्यपेक्षयास्तु । बुद्धेरपि बुद्ध्यन्तरस्मृत्यभिलापप्रवृत्त्याद्यपेक्षया स्वपरोपकाराद्यपेक्षया वेति । § 8

2a/jnams स्यादेतत् । केवलं कार्यपरम्परानुसरणपर्यवसानाभावे यदेकमपि किञ्चिदर्थक्रियाकारि कलयित्वा क्षणभङ्गसाधनम्, तन्न स्यात् । यदेव च कार्यं पर्यवसानेऽनर्थक्रियाकारि तेनैव पूर्वेषां तद्भावप्रसङ्गे नैकमप्यर्थक्रियाशक्तं सिद्ध्यतीति नासिद्धिपरिहारः । § 9

यत् पुनरेतद्भिन्नव्यावृत्तिकतया सत्तासिद्धावपि न कार्यत्वक्षतिरित्युच्यते, तदपि न सम्यक् । व्यावृत्तिभेदेऽपि हि सत्त्वसिद्धौ कृतकत्वस्यापि कथं सिद्धिः ? अभूत्वा भवनं हि कृतकत्वम्, भवनं च भवतामर्थक्रियाकारित्वमेव । ततोऽर्थकारित्वसंदेहे भवतोत्येव न शक्यम् । अपेक्षितपरव्यापारत्वं स्वभावनिष्पत्तौ कृतकत्वमित्यपि नासतो धर्मः । सत्ता चार्थक्रियैव । एवं प्रत्ययभेदे भेदित्वादयोऽपि सद्धर्मा न सत्तानिश्चयेऽभिधातुं शक्यन्त इति । § 10

3

अत्रोच्यते । न तावदङ्कुरादयः परितो निरस्तविभ्रमाशङ्केऽभ्यासविशेषासादितपटिम्नि प्रत्यक्षचेतसि परिस्फुरन्तो न सन्तः शक्यन्तेऽभिधातुमदर्शनेऽपि फलस्य । अन्यथा अर्थक्रियायामपि न कश्चिदाश्वास इति सदितरव्यवहारविरहान्निरीहं जगज्जायेत । § 11

---

२ भेदाः ] धर्मिणि र
४ हेतुः ] सामर्थ्यहेतुः अ
१२ स्य ] बीजस्येति नास्ति अ
१३ या ] ०त्यभिलास० र
१६ च ] वा र आ
१९ या ] सत्ता असि० र
२१ थं ] सत्त्वसिद्धिः आ र
२३ त्वं ] अभाव० र
२४ एवं ] ०भेदभेदि० र
२७ टिम्नि ] ०सादि पटि० अ
२७ न ] नोऽसन्तः र
२८ स्य ] हलस्य अ

अथ सत्त्वलक्षणं तावद् भवतामर्थक्रियासामर्थ्यमेवेति चेत् ? तत् किमिदानीं समयसिद्धेन लक्षणेन प्रत्यक्षबाधोऽभिधेयः ? तद् यदि भवतोऽपि लक्षणदोष एवानेन क्रमेण वक्तुमिष्टोऽभिधीयताम् । अस्माकं तु न तल्लक्षणप्रसाधनाय परिकरबन्धः, किं तु तल्लक्षणेन क्षणभङ्गसाधनाय । अतस्तल्लक्षणानवधारणं क्षणभङ्गसिद्धिप्रतिबन्धमादधीत कार्ये । कार्यान्तरदर्शने तु तत्रापि तदनुमानप्रसवः क्रमेण केन वार्यते ? इदानीं त्वर्थक्रियासमर्थस्यैव पक्षीकरणात् पक्षबहिर्भूते साध्यसाधनयोरसिद्धावपि न कश्चिद् दोष इत्युक्तप्रायम् । § 12

तस्मात् सामयिकलक्षणक्षतावपि किं पुनरनिश्चयमात्रे पटुतरप्रत्यक्षबलावलम्बितवस्तुभावे अङ्कुरादिवस्तुनि वस्तुधर्मस्य कार्यत्वस्य विरोध इति । तदपेक्षया बीजादिकमर्थक्रियासामर्थ्यसमर्थनसहमेव, कथमसिद्धिः ? § 13

नन्वर्थक्रियासामर्थ्यमितरद्वा वस्तुलक्षणमस्पृशतेन्द्रियज्ञानेन कथं वस्तुत्वमुपस्थापितमित्युच्यते ? तदपि यत् किञ्चित्, अनुभवे प्रमाणान्तरचिन्ताया निरवकाशत्वात् । दृश्यते हि शास्त्रीयलक्षणानुल्लेखेप्यभ्यासभावितप्रत्यक्षोदयमात्राद् वस्तुत्वमवसाय प्रवृत्तिरविसंवादभागिनीति किमत्र क्रियताम् ? एवं तु स्यात् । यदि परमार्थतोऽर्थक्रियासामर्थ्यमेव वस्तुत्वं तदा इदमतो जायत इति जन्माधिरणं वस्तूल्लिखता अध्यक्षेणार्थक्रियासामर्थ्यमेवोल्लिखितम् । अथान्यदेव वस्तुलक्षणं तदा तदेवोल्लिखितम् । यथा *त्रिगुणमयत्वमितरद्वाऽनुल्लिखिता तदबहिर्भूतं नीलं नीलग्राहिणा गृहीतमेवातत्सिद्धम्अध्यक्षेण 2b/jnams, 4 वस्तुत्वमङ्कुरादेः कार्यतासंवादेऽपि कार्यान्तरादर्शनेऽपि कारणस्य बीजादेरर्थसामर्थ्यमवस्थापयतीति । कार्यवत् तर्हि बीजादिकमपि प्रत्यक्षोदयादेवास्तु वस्तुसत्, किमर्थसामर्थ्यगवेषणेनेति चेत्—न वै वस्तुव्यवहारे प्रत्यक्षपाटवं परिभूयार्थशक्तिमनुसरामः, तस्या अपि प्रत्यक्षाधीनत्वात् । किं तु क्षणभङ्गमङ्गीकारयितुम् । प्रत्यक्षकृतो हि वस्तुव्यवहार उक्तक्रमेण तदतल्लक्षणसाधारणो न क्षणिकत्वसाधनाय नियमेन प्रभवति । अर्थक्रियासामर्थ्यं तु वस्तुलक्षणमभवदपि यत्र स्वयं वर्तते, तत्रावश्यं तदनुपनीय न स्वरूपसत्तामाविशति । ततः साधनत्वेनास्य प्रस्तावोऽत्र न वस्तुलक्षणत्वेनेति स्थितम् ॥ § 14

१ णं] तावदिति नास्ति र
२ बाधोऽभिधेयः] ०धोविधेयः र
३ न] नेति नास्ति अ
४ न्धः] साधनोपपरि० र
४ णेन] ०क्षणे अ
८ म्] प्रायः अ
१० स्तुभावे] ०तावस्तु० र आ
१० विरोध] ०नं वरोध आ
११ मेव] ०सामर्थनसहमेव आ
१२ द्वा] ०मतरद् र
१३ ते] ०मवस्थायितं आ
१५ मात्राद्] ०भरित० आ
१५ ताम्] क्रियाता अ
१७ ता] ०ध्येषणार्थ० र आ
१८ *] ०णीमयत्व आ र
१९ ग्राहिणा] ०मेव तत्सि० अ, मेवा र
२० देः] नस्तत्तमङ्कुरादेः र
२० तासंवादेऽपि] कार्यतामस्वामि ०अ
२२ त्] प्रस्तुत्सं० अ, वास्तुकिमर्थो र
२५ नाय] साधनीय र
२६ न] स्वरूपतामा० र
२७ तः] साधनके र

अथ बौद्धस्यायं विचारो मम त्वत्रानिष्टिरेव । ततो बौद्धस्यैव सिद्धान्तविरोधः, साधनस्य च वाद्यसिद्धता दोष इति चेत्—स तावदयं विचारः प्रमाणम् अप्रमाणं वा ? प्रमाणत्वे तवैवायं न ममेति विभागानुपपत्तिः । प्रत्युत प्रमाणाद् बहिर्भावस्वीकारे नाधिकारः प्रतिवादेऽपि तवेत्यायातम् । अथाप्रमाणम्, तदा यदि नामागमप्रदेशप्रतिपादितोऽर्थः कश्चिन्न समर्थः प्रकृतस्य तु न क्षतिः । तदेतदायातम्— § 23

यदि किञ्चित् क्वचिच्छास्त्रे न युक्तं प्रतिषिध्यते ।
ब्रुवाणो युक्तमप्यन्यदिति राजकुलस्थितिः ॥ *[Note: प्र० वा० ४. ६३]* § 25

इति । सौत्रान्तिकसमयस्थितस्य हि क्षणभङ्गं प्रसाधयतः स्थित्यन्तरविरोधो न बाधकः । अन्यथा § 26

आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्, *[Note: अभिधर्मकोशे २. ५]* § 27

इत्यनेन किं नवाभिधानम् ? नैयायिकस्य चोपमानं प्रमाणमिच्छतो वैशेषिकापेक्षया कथं न सिद्धान्तविरोधः ? भिन्नप्रस्थानत्वं तु स-
7 मानम् । शक्तिसंश्रयश्च न सौत्रान्तिकनीतिमतिक्रम्य । यदि तु तत्रापि न स्यात् शक्तिस्थितिः, तदा स्वप्रतिभासमात्रमाचष्टे न बौद्धसिद्धान्तस्थित इति स्यात् । तस्मान्नयान्तरविरोधेऽपि न सिद्धान्तविरोधयोगः । नापि वाद्यसिद्धिः । न च वस्तुबलप्रवृत्तानुमाने शास्त्रानुरोधः कश्चित् । तद्विचारप्रामाण्ये तु सांवृतत्वेऽप्यर्थशक्तेरवश्याभ्युपगन्तव्यतया तदुपनीतक्षणभङ्गसिद्धिबाधितनित्याभिमतसामान्यसमवायादिकल्पनमधरसंवृतित्वाद् बालसंवृतिवन्नोपादेयम् अर्थक्रियाशक्तौ । अशक्तौ स्वविषयज्ञानजननेऽप्ययोग्यस्य सत्त्वाभ्युपगमः संवृतिरस्तु किं त्वधरतोऽप्यधरेति निश्चयः । अतएवाधराधरसंवृत्यपेक्षयोत्तरोत्तरासु परमार्थत्वेन *व्यवस्थाप्यमानावश्याभ्युपगन्तव्या, निरुत्तरार्थक्रियैव संवृतिः परमार्थ इति तया सत् परमार्थसदुच्यते । तथाहि बालस्य दर्पणतले वदनग्रहमपेक्ष्यासदेव वदनमत्र ख्यातीति परमार्थ इति उच्यते । तदपेक्षया च दर्पणप्रतिहतिव्यावृत्त्या नेत्रांशवः स्वमुखमेव गृह्णातीति परमार्थः । एवमुत्तरोत्तरपरिकल्पेषु बलवत्सु पूर्वपूर्वः संवृतिरुत्त-

१ अथ] ०स्यैवायं र
१ त्रानिष्टिरेव] ०रिव र
१ स्यैव] ०स्याय० र
३ वैवायं] तवाय० र
५ र्थः] मायम० र
१४ म्य] क्रमस्य र
१५ दा] ०स्तया अ
१५ न] ०माविष्टेन अ
२० क्तौ] स्वेति नास्ति अ
२२ त्वेन] ०र्थ केन र
२२ *] ०प्यमानावस्त्व० र,
०प्यसामर्थवश्या० अ
२३ ते] उच्यते इति नास्ति र
२४ ख्यातीति] इतीति नास्ति अ
२६ ल्पेषु] निर्विकल्पेषु अ

अथ क्षणभेदेनाभेदस्यादृष्टपूर्वत्वान्न संशय इति चेत्—नैतदपि साधु । न ह्यदृष्टमित्येव नास्तीति शक्यते वक्तुम्, सतोऽपि सूक्ष्मतयाऽनुपलक्षणात् । तत्क्षणोदयव्यय देहोपचयापचयवत् । ततोऽनुपलक्षणेऽपि भेदस्य स- 6b/jnams
त्ताङ्गोल्लेखशेखरो दुर्निवारः संशयः । एतावद्विमर्शाभावे तु इतरजनस्य निश्चल एकावसायः स्यात् । यौक्तस्तु सोऽपि संशय एव । किं च क्षणभेदेनापि भेदः प्रमाणपरिदृष्टत्वाद् दृष्ट एव । यथा धारादौ कियत्यपि नभोभागेऽप- 14
रापरपयःपातेऽपि तदेवेदमुदकमित्यवधारणस्य विपर्ययस्थितेश्च संभवात् । § 49

अनभ्यासदशायामेकताग्रहः तत्र स्तम्भादौ त्वभ्यासवतोऽपीति चेत् ? ननु क्षणभेदभाविनि विशेषे सर्वत्रैवास्मादृशोऽनभ्यास इत्युपपादितमेव । अम्भःस्तम्भादौ तु तत्क्रियासार्थसामान्यालम्बनः सर्वत्राभ्यासः स्थूलविषयः । तस्मान्न प्रत्यक्षेण क्षणद्वये अभेदसाधनव्यापारः स्वीकर्तुं शक्यः । एकावसायमात्रं तु सदपि व्यभिचारादसमर्थम् । § 50

ननु सर्वत्र नीलादौ पृष्ठभाविना विकल्पेन प्रत्यक्षस्य व्यापारोऽनुगम्यमानः प्रामाण्यमुपनयति । तदेकतावसायोऽप्येकविषयमेव प्रामाण्यमस्य दीपयत्विति चेत्—न खलु सर्वत्र पृष्ठभाविविकल्पविषये प्रामाण्यमिन्द्रियज्ञानस्य । मरीचिविषयस्यापि जलावसाये जलविषये प्रामाण्यप्रसङ्गात् । विकल्पापेक्षं तु प्रामाण्यमिति तदनुदये न प्रामाण्यमिति न्यायः । तदुदये तु संवादापेक्षमेव तत् । न चैकाध्यवसायस्य संवादः स इत्यावेदितमेतत् । § 51

ननु यत्र बाधः, तत्राप्रामाण्यमबाधिते प्रामाण्यमिति किं न पर्याप्तम् ? *इयं गतिरवनतगगनप्रतिभासेऽपि देशकालनरान्तरव्यापिनी संभवति, निरूप्यमाणा त्रुट्यतीति प्रत्यभिज्ञायामपि समानम् । § 52

किं चायमबाधो नाम बाधाविरहो बाधानुपलब्धिर्वेति विकल्पयोः क्रमाद् असिद्धिरनेकान्तश्च दुष्प्रतिविधानः । अनुपलब्धिमात्रेण निषेधासिद्धेः, बाधकस्य चानुमानस्याभिधास्यमानत्वात् । अथ प्रत्यक्षसमाख्यातेयं प्रत्य-

१ अथ] न भेदस्या० अ
१ त्वान्न] पूर्वक र
२ णात्] ०नुपलक्ष्यमाणत्वात् र
३ य] व्यय इति नास्ति र
३ णेऽपि] ०ऽन्वलक्षणेऽपि र
४ रो] ०त्तांशोल्लेख० र
५ सोऽपि] यौक्तभ्रमेपि ? अ
७ स्थितेश्च] ०मितेश्च र
९ त्र] ग्रहणतन्त्र र
१० विशेषे] स च एवास्मा र
११ तु] ०वत्क्रियापरम्वा र
१२ ये] प्रत्यक्षेण द्वये र, प्रत्यक्षेण क्षण० अ
१४ ल्पेन] वैकल्येन अ
१६ ये] विषयप्रा० अ
१७ ये] विषयप्रा०
१८ न] तदनुदयन० र
१९ तु] तदुत्पत्तिसंवादा र
१९ संवादः] पाठो घृष्टः अ
२१ त्र] यत्र एवा० र
२२ *] इयं च भिनवतमं ? र
२३ तीति] ०ति अ भिज्ञा र
२५ श्च] ०रनैकान्तिकश्च र
२५ निषेधासिद्धेः] मात्रनिषेधा अ

सहकारित्वमेव न स्यात् । तथाहि यदि तमेव कुर्वन्ति तदा तत्कारिण एव स्युः न तत्सहकारिणः । तेन सहैकं कार्यं कुर्वन्तो हि तत्सहकारिणोऽभिधीयन्त इति । तथा भवतु नामानुपकारकोऽपि सहकारी, तथा यदि तस्य प्रागेव शक्तिरस्ति किं न करोति ? नास्ति चेत्—पश्चादशक्तः कथं करोति ? पश्चाच्छक्तश्चेत्—शक्ताशक्तयोः कथं न नानात्वम् ? विरुद्धधर्माध्यासस्य भेदकत्वादित्याशंक्य सहकारिसाकल्यं हि तस्य शक्तिः । तद्वैकल्यं चाशक्तिः । तेन सहकारिवैकल्ये प्रागशक्त उच्यते । पश्चात् साकल्ये च शक्तः ।* धर्मधर्मिणोश्च भेदः प्रसाधितः । तेन शक्त्युत्पादेऽपि नावश्यं तदुत्पादः । अशक्तिनिवृत्तावपि नावश्यं तद्वतो निवृत्तिः, प्रतिबन्धाभावादिति । § 69

तदेतत् सर्वमपोहप्रस्तावे धर्मधर्मिणोरभेदप्रतिपादनेनैव निरस्तं वेदितव्यम्, साकल्यवैकल्ययोराविर्भावतिरोभावाभ्यां धर्मिण एव तथावस्थानात् ।* अस्तु वा धर्मधर्मिणोर्भेद एव । नापि सहकारिणामकिञ्चित्करत्वे विप्रतिपद्यामहे । केवलं न तावन्त एव सहकारिणः कार्यकारिणः । नापि साकल्यमेव कार्यमर्जति, किं तु सोऽपि भावः । *तदर्थं तैरेव प्रयत्तमिति न विस्तरेणोपयोगः । तस्य च भावस्य यादृशश्चरमक्षणेऽक्षेपक्रियाधर्मा स्वभावः, तादृश एव चेत् प्रथमक्षणेऽपि, तदैव प्रसह्य कुर्वाणो गीर्वाणशापेनापि नापहस्तयितुं शक्तः । किं पुनस्त्वामुना मर्मपीडाजनितविक्लवविक्रोशमात्रेण ? यथाहि शक्ताशक्ततया भङ्गप्रसङ्गपरिहाराय साकल्यवैकल्यलक्षणधर्मान्तरस्वभावे शक्त्यशक्ती भिन्नस्वभावे कल्पिते, तथा न सोऽप्यक्षेपक्रियाधर्मा स्वभावो भावाद् भिन्न एवाभिधातुं शक्यः, भावस्याकर्तृत्वप्रसङ्गात् । § 70

अथ यथा शक्त्यशक्ती भिन्नौ धर्मौ प्रतिजानीमहे, न च तयोरुदयव्ययाभ्यां भावस्य किञ्चित्, तथाऽक्षेपक्रियाधर्मत्वं क्षेपक्रियाधर्मत्वं च धर्मान्तरमेव । तच्च *सहकारिसन्निधानप्रत्ययभावाक्षेपमुदेति व्येति चेति । तथैव भावस्य न किञ्चिदित्युच्यते । § 71

उच्यताम् । केवलमस्तु नेदानीं कार्यजन्म, कारणाभिमतस्य तादवस्थ्यात् । तथाहि यथा न सहकारिण एव, नापि साकल्यमेव जनकं
9a/jnams, 20 तथा साकल्ये सति जातमक्षेपक्रियाधर्मत्वमपि न प्रकृतं भावमनपेक्ष्य जनकम्, जनकत्वेऽपि स्वयमेव भावस्य जनकत्वस्वीकारात् । किं तु प्रकृतोऽपि भावः कर्ता स्वीकर्तव्यः । स च प्राचीनदशातोऽनतिरिच्यमानमूर्तिः

---

४ स्ति ] शक्तिरिति र
४ चेत् ] नेति चेत् र
७ * ] ०कल्ये शक्त इति र
८ र्मिणोश्च ] धर्मिधर्मणो र
१२ * ] स्थानतः र
१२ र्मिणोर्भेद ] एव...कारिणामिति नास्ति आ
१४ * ] एतदर्थं र
१४ तैरेव ] प्रतिपन्न० र
१६ शापेनापि ] गोपेना० र
१७ क्तः ] शक्तः अ
१९ भावे ] शक्त्युक्ती ? अ
२३ * ] ०धापन० र
२३ चेति ] चेतीति नास्ति र
२७ था ] तथेति नास्ति र
२७ ति ] ०नभि० अ
२८ त्वेऽपि ] अपीति नास्ति र
२८ तु ] प्रकृतितो र

कुर्वन् पूर्वमपि कुर्यात्, अकुर्वन् वा पश्चादपि न कुर्यादिति तदवस्थः परिभवः। यदि तु कादाचित्कं साकल्यादिवस्त्वन्तरमेव हेतुः, तदा कार्यमपि तदपेक्षं कादाचित्कमिति न्याय्यमेतत्। एवं यावद् यावद् धर्मान्तरपरिकल्पः, तावत् तावदुदासीनो भावः। अथ अक्षेपक्रियाधर्मत्वं जातं, कार्यं तु ततो नोत्पद्यत इति कोऽयं न्यायः? तदवश्यं कार्येण जनितव्यम्। तच्चाक्षेपक्रियाधर्मत्वं प्राङ्गासोदिति कार्योदयस्यापि नावकाशः। एवं तर्हि कार्योत्पादनान्तरीयकमक्षेपकारित्वम्, अक्षेपकारित्वनान्तरीयकश्च कार्योत्पाद इति व्यक्तमितरेतराश्रयत्वम्। अन्यथा न यदि कार्योत्पादनान्तरोयकमक्षेपकारित्वम्, नाक्षेपकारित्वेन कार्योदयाक्षेपः। *यदि च नाक्षेपकारित्वनान्तरोयकः कार्योत्पादोऽक्षेपकारित्वात् प्रागपि स्यात्। एकार्थत्वे तु साकल्ये जाते सत्यक्षेपकारित्वं धर्मान्तरं जातमिति किमनया भाषयाभिहितं कार्यमुत्पन्नमिति? तथा च सति न प्रकृतदोषपरिहारः। नहि कार्यजन्मनि विवादः, यत्स्वरूपापेक्षस्तु कार्योदयः तस्य सर्वदा तादवस्थ्यात् कथं कदाचित्कतेति चिन्त्यते। § 72

तस्मादक्षेपक्रियाधर्मेति जनयतीति वा यत्स्वरूपपुरस्कारेणेयमभिख्या तस्य प्रागपि सत्त्वे कथमजनि कदाचित्? अक्षेपक्रियाधर्मकप्रत्यनोकस्वभावस्य वा प्राच्यस्य पश्चादनुवृत्तौ कथं कदाचिदपि कार्यसंभवः? अथ यदि स एवैकः कर्ता स्यात्? युक्तमेतत्, किं तु सामग्री जनिका तत्सहकार्यन्तरविरहवेलायां बलीयसोऽपि न कार्यप्रसव इति किमत्र विरुद्धम्? एकार्थकरणाच्च सहकारित्वमुक्तम्, नोपकारेणेति। § 73

अत्रोच्यते। यदि मिलिताः सन्तः कार्यं कुर्वते, *तदेकार्थकरणलक्षणं सहकारित्वमेषामस्तु, को निषेद्धा? मिलितैरेव तु तत् कार्यं कर्तव्यमिति कुतो लभ्यते? पूर्वापरकआर्ययोरेकत्वे तावद् भावस्य सर्वदा जननाजननयोरन्यतरनियमप्रसङ्गस्य दुर्निवारत्वात्। तस्मात् सामग्री जनिका, नैकं जनकमिति स्थिरवादिनां मनोरथस्यान्यविषयः। दृश्यते तावदेवमिति चेत्—
अतएव न स्थैर्यपक्षः क्षम इति ब्रूमः। सर्वो हि प्रसङ्गो विपर्ययपर्यवसानः 21
। ततो यदि नित्यता स्यात् जनयितुः, जन्यं सर्वदा स्यान्न वा कदाचिदपीति। न चैवम्, साकल्य एव कदाचित्कार्योत्पत्तिरिति नियमेन स्वभावभङ्गः। § 74

२ मेव] ०रं नैव अ
४ त्] ०न्तरमपि विकल्प० र
४ अथ] यथा र
५ तु] कार्यं च अ
५ तो] तत इति नास्ति र
६ प्राङ्गासोदिति] पाठो घृष्टः अ
९ *] यदि च नाक्षेपकारित्व० नास्ति र
११ जाते] सत्यपेक्ष० र
१८ निका] ततः र
२१ दि] यदा र
२१ ते] कुर्यात् र
२१ *] कार्यं० र
२२ तु] तुकारस्त्यक्तः र
२३ कुतो] क्व र
२३ द्] कालयोः कारकस्वभावत्वाद० र
२३ दा] जनना नास्ति र
२६ म] क्षयः र
२८ त्तिरिति] ०त्पत्तेरि० अ

ननु यदि क्वचिन्नित्यं सर्वदा कारणमुपलब्धं स्यात्, तदा क्वचिन्नित्यत्वाभ्युपगमे सदा कर्तृत्वप्रसङ्गः संगच्छते । यावता सर्वदा तस्याभावात् कथमेतादृशं प्रसञ्जयितुं शक्यते ? §75

9b/jnams तदेतदपि ग्राम्यम् । तथाहि नित्यत्वे सतीति । अस्यायमर्थः । परकालभावी जनको यः स्वभावो भावस्य, स एव यदि पूर्वकालभावी, पूर्वकालभावी वा योऽजनकः स्वभावः स एव यदि परकालभावी, तदा तदुपलब्धमेव जननमजननं वा स्यादिति । तथा च सति सिद्धयोरेकत्वारोपे सिद्धमेव जननमजननं वा प्रसज्येत । न पूवपरस्वभावयोरेकत्वसंभवान्नित्यत्वे सतीत्युच्यत इति किमत्र विरुद्धम् ? §76

अथ पूर्वपरयोरेकत्वं नोपलब्धं कथमारोप्यत इति मनीषा ? एवं सति शुक्तावपि रजतारोपेण न भाव्यम् । नहि रजतस्वरूपा शुक्तिः क्वचिदुपलब्धिगोचरः । आरोप्यमाणं तु रजतं कदाचिदुपलब्धमेवेति नारोपक्षतिरिति भवतामपि कृतान्तः । तथा प्रस्तुतेऽपि पूर्वापरस्वभावयोरेकत्वं नोपलभे । आरोप्यमाणौ तु मिथः पूर्वापरस्वभावौ सिद्धावेव । तदारोपे करणाकरणे अपि प्रसज्यमाने समञ्जसे एव, गुञ्जापुञ्जे ज्वलनारोपविधौ दाहवत् । §77

तदेतदतिलाघवमाविष्कृतमात्मनः शङ्करेण । तदयं जात्यन्धानां नीलादिप्रतिवेधवदसंबन्धो निषेधः सौगतानामसन्तोऽक्षणिका इत्यभिदधानेन । तस्मात् स्थितमेतत्, स्थिरात्मत्वे मिलित्वैव कार्यकरणनियमो भाग्यहीनमनोराज्यस्थानीय इति । तथा च सति सहकारिसाकल्ये शक्तिशब्दसमयमपाकुर्वाणः कमर्थं परिपुष्णाति परव्यामोहनादन्यमनुपयुक्ताप्रस्तुताभिधानात् ? क्षणिकत्ववादिना हि शक्ताशक्तस्वभावतया विरुद्धधर्माध्यासाद् भेदमारोपयता यादृशी शक्तिरशक्तिश्च विवक्षिता तत्प्रतिविधानमाचरितुमुचितमस्य ।
22 तदपहाय स्वयं कृत  सङ्केतेन परिहारमारचयतीति महन्नैपुण्यं नैयायिकप्रवरस्य । यो हि धूमादत्राग्निना भाव्यमित्याह—तत्रापि यदि कश्चिद् गर्दभादौ धूमशब्दं संकेत्य वह्निमपह्नवीत, न कश्चिद् दोषः । क्षणिकवादी हि यज्जनयतीति समाख्यया यदनन्तरभावि कार्यं तत्स्वरूपं शक्तमित्याह । न चेदमपूर्वं सकेतमात्रम् । लोकेऽपि हि जननद्वारक एव शक्तव्यवहारः ।

१ दा] कारक० अ
२ स्याभावात्] तस्यां भावात् अ
५ स्य] भावस्या र
७ त्वारोपे] रेकत्वारोपे… …नपूर्वापर० इति भागस्त्यक्तः र
११ तारोपेण] रजतंआरोपेण र
१३ स्तुतेऽपि] अपीति नास्ति अ
१३ त्वं] पर्वपरयोरेकत्वं अ
१५ माने] प्रसंज्यमाने अ, र
१५ एव] समं यत्स एव अ
१७ निषेधः] ०वदसम्बद्धो निषेधः इति नास्ति र
२० पाकुर्वाणः] समयमयं र
२० रिपुष्णाति] ०मर्थे पुष्णाति र
२१ वादिना] क्षणिकवादिना र
२२ क्तिश्च] ०रशक्तिश्चेति नास्ति र
२३ तीति] ०माचरती र
२३ न्नैपुण्यं] नैपुन र०
२६ तीति] जज्जनयती० र
२६ या] समाख्येयं र
२६ मित्याह] शक्तमाह अ
२७ एव] एवं र

क्रियया बाधा वा । वातादयः किमुपचिन्वन्ति अपचिन्वन्ति वा स्फटिकादौ, *येन सहकारितया कल्प्यन्ते, प्राग्भावित्वमात्रेण कारणत्वेऽतिप्रसङ्गाद् इति चेत्—न वै स्थूलः कश्चिदुपचयोऽपचयो वा क्रियते तैस्तस्य । *अतएवात्यन्तसदृशोदयः । सूक्ष्मस्तु अशक्योपलक्षणतया यथेदंतया निर्देष्टुमयोग्यः, तथा निषेधमप्ययोग्य एव । एवमनेकवस्तुसंकरे कदाचित्केनचिदुपयोगे न किञ्चिद् वस्तु प्रस्तुतोपादानस्य सहकारि स्यादिति न सर्वथा सहकार्यन्तरविरहादेकस्य जननसङ्गतिरवगन्तव्या इत्युपन्यासस्यार्थः । स्थिरत्वसिद्धौ
32 तु यदि त्वमपि स्वप्रक्रियां निर्वाहयितुमीशिषे, ईषिष्य । बौद्धसाधनविचारस्तावत् प्रस्तुतोऽयम् । तत्र च प्रस्तुतेऽनेककार्येणानेकेन भाव्यमिति केन कर्णे भवतो निवेशितम्, यतः प्रदीपदृष्टान्तीकरणं भवतः शोभेत ? तदिदमुच्यते, अन्यो व्याधिरन्यदौषधमिति । § 114

यदप्याह, यदेव च सहकारिभेदेन कार्यभेदे प्रदीपस्याभेदसिद्धौ साधनं, तदेव क्रमवत्सहकारिभेदेन कार्यभेदेऽक्रमस्यापीति, तदप्यत्यन्तमसंबद्धम् । अद्वयाकारमिन्द्रियप्रत्यक्षमेव हि भेदभ्रंशमाशंसति प्रदीपे । सप्रतिघस्य हि प्रदीपस्य नैकस्थानम् । भिन्नदेशस्य चात्यन्तसदृशस्यापि भेदोपलक्षणमनिवार्यं मायागोलकवत् । अत एकाकारमिन्द्रियज्ञानमेकतायामेव प्रदीपमवस्थापयति । कालभेदे हि भिन्नेऽपि वस्तुन्यत्यन्तसदृशे प्रत्यभिज्ञानमुपजायमानमुपलब्धम् । न च प्रत्यभिज्ञानादन्यदेकतासाधनम् । तत्कथं तदेव साधनमिति न प्लवते ? न च सदृशतया कालभेदेन प्रत्यभिज्ञानस्य संशयाङ्गत्वं व्यभिचारदर्शनात्, लक्षणभेदविरहात् । सकृदभेदभासिन्यपि प्रत्यक्षेऽनाश्वासः, तथा क्वचिददर्शनात् । इन्द्रियज्ञाने हि क्रमदर्शनेऽपि न योग्यमर्थद्वयं प्रतिघाति, एकीभूयोपलभ्यमानमुपलब्धम् । तत्कथं सर्वत्रानाश्वासः ? तस्मादनुपयोगि प्रदीपदृष्टान्तेन प्रत्यवस्थानम् । § 115

एतदेव रूपं दृष्टान्तीकृत्याभिप्रायान्तरमस्य द्योतयन् न्यायभूषणेऽपि यदाह—अपि च येन स्वभावेन रूपं रूपान्तरं करोति, न तेनैव रसादिकम्, रसादेरपि रूपस्वभावताप्रसङ्गात् । ततः सर्वं रूपकार्यं चक्षुषा गृह्यते । न चैतदिष्टम् । तस्माद् यथा रूपं रूपान्तरोत्पादनस्वभावेन तदेव करोति, विज्ञानोत्पादनस्वभावेन विज्ञानमेव करोति, न रूपादिकम् । रसोत्पाद-

---

२ *] स्फटिकादेः र
२ येन] येनेति नास्ति अ
३ चेत्] इति चेत् इति नास्ति अ
३ वै] नैव अ
३ स्थूलः] पाठो घृष्टः अ
३ *] अस्ति तत्र अ[[Reference of note not clear from print.]]
४ स्तु] अशक्योप० र
५ योगे] केनचिदिति नास्ति र
८ क्रियां] स्वक्रिया र
१२ देव] यदेव र
१२ कारिभेदेन] ०भेदि र
१३ स्यापीति] कार्यभेदाऽकर
१३ म्] ०त्यन्तासम्ब० अ
१७ हि] भेदो हि र
१७ दृशे] सदृश० अ
२१ हि] भ्रमदर्शने र
२२ म्] ०मुपलम्भर्थं र
२३ योगि] योगिन० अ
२६ ङ्गात्] स्वभावप्रस० अ

योऽपि युक्तः, अपरिमितोपाधिसंभवेऽपि तद्वतो व्ययानिष्टः । अस्मद्दर्शनेऽपि यदि नाम वस्त्वन्तरराशेरुदयः, तथापि प्रकृतभावस्य कीदृशी क्षयोपपत्तिरिति व्यक्तमेतत् । स तु राशिः प्रमाणमन्वियान्नवेति चिन्त्यम् । भवतु वा मूलापलापः । ये तु स्वभावा भाविका इष्टाः तदात्मनि मग्नत्वान्मूलस्यैकं पृथक् सत् क्षणिकं मा भूत् । भूयांसस्तु क्षणिकाः सन्त इत्युपचय एव क्षणिकतायाः, कथं क्षणिकतायाः सत्त्वव्यावृत्तिः ? तदेवमेवंविधाः प्रलापा ग्राम्यजनजनितमहिमानस्तेष्वेव शोभन्ते, न तर्ककर्कशकुशाग्रीयबुद्धिषु बौद्धेषु । या तु शिक्षा स्वभावभेदसाधनाय स्यादेतदित्यादिः सैषामेवास्तु, अन्योऽन्यस्य स्वभाव इति स्वस्थस्य वक्तुमशक्तेः । स्वभावभेदस्तु साधनासंभवादध्यक्षबाधनाच्च परिहृत एव । न च भवन्नपि प्रकृतदोषसंस्पर्शी । नापि सहकार्यन्तरमेव स्वभावान्तरमिति दन्तनिष्कोषिकया स्वभावभेदसाधना हेतवो विपर्यासयितुं शक्यन्ते । क्षणिकवादी हि सहकारिणः पश्यन्नेव प्रसिद्धस्वभावभेदसाधनाय साधनमुपन्यस्य न कथमप्यनेन वचसा प्रतारयितुं शक्यः । तद्वरं तत्साधनमसाधनमेवेति मुख्यमाख्यायतानिष्टसिद्धव्याघातादिति ।
§ 135

41

तत्र चोक्तमस्माभिः । न च सहकारिसाधनायैव प्रत्यवस्थातुरयं प्रयत्नः । *कार्येणानुभूतान्वयव्यतिरेका हि सहकारिणः प्रत्यक्षादिप्रमाणसिद्धा एव किमत्र साध्यम् ? ततोऽक्षणिकाभिमतस्य क्रमवतीषु कार्यव्यक्तिषु स्वलक्षणभेदसाधन उपन्यस्ते दूषणमनुक्त्वा सहकार्यन्तरमेव स्वभावभेद इति लपनं यदि स्वहृदयसन्तोषमालम्बेत, आलम्बताम् । न तु परसाध्यं बाधितमनेन । तस्मात् सिद्धमर्थक्रियाकारित्वमस्थैर्येण व्याप्तमिति ॥ § 136

यदप्यनेनोक्तम्—किं चेदं तावदयं क्षणिकवादी प्रष्टव्यः । पूर्वस्य क्षणस्योत्तरस्मिन्नेकसन्तानवर्तिनि क्षणे कर्तव्ये नान्यत् किञ्चिदपेक्षणीयमस्ति । ततश्च परोत्पत्ति प्रत्यनपेक्षत्वात् तन्मात्रानुबद्धेनोत्तरेणापि सत्येव तस्मिन् भवितव्यम् । अभवन् वा तन्मात्रानुबद्धो न स्यात्, अपि तु निमित्तान्तरापेक्षो विज्ञायेत । असभागोत्पत्तौ तु *पूर्वे समानसन्तानवर्तिन एकसन्तानान्त-

---

२ नाम] ०राशि० र
३ त्तिरिति] ०रिव्यक्त० अ
३ राशिः] प्रमाणे मन्वि० र
५ तायाः] क्षणितायाः अ
६ लापा] जन० इति नास्ति र
८ दित्यादिः] ०त्यादि र
९ स्तु] स्वभावकाभिः?भेदस्तदैव र
१० र्शी] दोषस्पर्शी अ
११ मेव] कार्यान्तर० अ
११ या] निष्णोषिक? र
१२ न्ते] वाक्षन्ते र
१२ न्नेव] प्रेति नास्ति र
१६ त्र] तत्रैवो० अ
१६ नायैव] साधनाये प्र० र
१७ *] ०नानुकृता० र
१९ नुक्त्वा] ०ममुक्त्वा अ
१९ नं] नय? येन र
२० तु] यत् अ
२३ ण] ०स्यक्षण इति नास्ति अ[[Reference of note not clear from print.]]
२३ व्ये] कर्तव्ये इति नास्ति अ
२४ रेणापि] ०बन्धे० अ
२५ द्धो] ०बन्धो र
२६ *] पूर्वस० र

तदप्यसंगतम्, एकस्वभावत्वासिद्धेः । सभागक्षणपरम्परापेक्षया सिद्ध-मेकस्वभावत्वमिति चेत्—न, सर्वथा सभागत्वासिद्धेः । सजातीयार्थो हि सभागार्थः । सजातीयत्वं च विविधम् । रूपतः शक्तित उभयतश्चेति । तत्र यद्यपि रूपमात्रकृतं सजातीयत्वमुत्तरस्योत्तरेण, तथापि सामर्थ्यकृतं नास्ति । ततः कृतं विजातीयत्वमेव । अतएव बीजादीनां स्वभावपरिणामपरम्परया कियत्याप्यङ्कुरकार्यनिष्पत्तिः । तत्र हि अन्तिमस्य बीजक्षणस्याङ्कुरे शक्तिः । अन्तिमे पुनरुपान्त्यस्योपान्त्ये च तत्पूर्वस्येत्येवं यावत्प्रथमबीजसंभवः । एवं सहकारिसामग्र्यपि तत्रापरापराविशिष्टैवेति वेदितव्यम् । अतएवापरापरप्रत्य-ययोगेन प्रतिक्षणभिन्नशक्तयः संतन्वन्तः संस्कारा यद्यपि कुतश्चित् साम्यात् सरूपाः प्रतीयन्ते, तथापि भिन्न एवैषां स्वभावस्तेन किञ्चिदेव कस्यचित् 18a/jnams कारणं कार्यं वेति न्यायः । ततः सर्वथा सभागत्वविरहात् पूर्वस्योत्तरक्षण-जननसामर्थ्येऽपि नोत्तरोत्तरजननमस्य, ततः शक्तिविशेषेण विशेषात् । तथा तस्याप्यन्यस्मात् शक्तेरुपचयोऽपचयो वा ? उभयोरपि विशेष एवोच्यते । 43 विशिष्यतेऽन्यस्मा दिति । तत् कथमेकक्षण एव सर्वेषां सभागाभिमतक्ष-णानामुपनिपातचोद्यावकाशः ? अन्वयव्यतिरेकोत्प्रासोऽपि पश्चिमो दुश्चरित-मेव । क्षणभङ्गसाधनसामर्थ्याकदर्थने हि यदेकानन्तरमन्यजन्म, स एवान्वयः । यच्च तत्कारणस्य प्रागसंभवेऽसंभव एव देशकालान्तरे कार्यस्य, स एव व्यतिरेक इति किमत्र क्रियतामनिच्छतापि ? नित्यवादिनोऽपि हि न स-हैव हेतुफलयोर्जन्म । किं तु हेतुजन्मानन्तरं फलस्य जन्म । यत्क्षणाच्च कारणस्य कार्यमुदयवत् ततः प्राक् पश्चाद् वा संभवे कारणस्य कार्यस्य क उपकारः ? तत्क्षणान्तरमस्य जन्मेति तावतैव कृतार्थत्वात् कार्यस्य ताव-तैवान्वयः, तदभावेऽभावश्चेति व्यतिरेकश्च । केवलं तत्क्षणात् प्राक् पश्चादपि कारणाभिमतस्य भावः प्रमाणोपनीतेन कार्यानुपयोगमात्रेण परिहर्तुं शक्य इति तावन्नित्यवादिनो विशेषः । स च विचारितः । अन्वयव्यतिरेकौ तु यथोक्तमात्रेणेति स्थितम् ॥ § 141

यदपि सत्त्वस्यासाधारणतां प्रतिज्ञाय एकस्मादनेकस्मादेकमनेकं वोत्प-द्यत इति विमृश्यानेकस्मादनेकोत्पत्तिपक्षं स्थितमादायोवाच वाचस्पतिः, किं पूर्वे क्षणा उत्तरेषां क्षणानां परस्परं निरपेक्षा एव जनका आहोस्वित् सापेक्षा इति । § 142

ननूक्तमन्त्यक्षणप्राप्ताः परस्परमनपेक्षाः कार्याणि जनयन्तीति । तत् किमनभ्युपेतारोपप्रपञ्चेन ? तत् किमिदानीं समर्थबीजक्षणजनकोऽपि त-

१ त्वासिद्धेः ] ०सिद्धः अ
५ कृतं ] तत्कृतं र
८ पि ] ०परापर० र
१२ विशेषात् ] शक्तिविशेषणात् र
१३ वा ] रूपादयो? पचयोर्वा र
१५ काशः ] मुपरिपाततत्वाभ्य?वकाशः र
१६ मेव ] ०तश्चरित० र
१६ हि ] ०मेपि र
१९ हैव ] सहसैव र
२० स्य ] सम्भवेन कारणेस्य र
२३ नीतेन ] प्रमाणोयनीतो न अ
२४ वादिनो ] इत्ययं नित्य० र
२८ पेक्षा ] ०स्परनिर० र
२८ सापेक्षा ] ता० टी० पृ० ८४१
३० प्राप्ताः ] मनक्षये?भागे र
३१ किमिदानीं ] सम्बन्ध० र

चेति द्वेधा । तच्च प्रत्येकं चेतनसमवेतमचेतनसमवेतं चेति चतुर्धा भवति । तदेवं न हेतुसामग्री सर्वा सर्वाकारेण प्रत्यक्षा पुरुषमात्रस्य । § 153

तथा च त्रिलोचनः । कश्चित् सहकारिप्रत्ययः प्रत्यक्षः परोक्षश्चेतरः । ततश्च प्रत्यक्षपरोक्षसहकारिप्रत्ययसाकल्यमसर्वविदा प्रत्यक्षतो न शक्यं
47 प्रतिपत्तुमिति । यदंशेनापि सा सामग्री प्रत्यक्षा तत्राप्यवान्तरसूक्ष्मभेदपरिगणनाय न समर्थः पृथग्जनः स्थुलदर्शित्वात् । ततो भवेदपि तादृशस्वभावभेदः केषाञ्चिद्बीजानामुपलब्धकर्मकरपाणिप्रणयानां यः परम्परया प्रकृतकार्यमर्जितुमूर्जस्वी, यश्च नान्येषां तदेककुशूलस्थानामपि, न चैनमन्वियाल्लोकः । न चानवधारणमात्रेण तदभावः, संशयस्तु स्यात् । स च कार्येण करस्पर्शेण न भवता परिभूयते । तथाचैकशरीरावयवानामविभक्तमातापितृसंयोगादिसामग्रीसंभवानां क्वचिदेव तिलकश्चित्रकचिण्टिकादय उदयमासादयन्तः सहजाः क्रमजा वोपलभ्यन्ते । अस्ति च त्वङ्मांसादिसाम्यमन्यावयवेष्वपि । तदमी तिलकादयो विभागेन भवन्तो दृष्टादृष्टकारणसामग्रीपरिणतिविभागमनुपलक्ष्यमपि ख्यापयन्तः कथमिव निषेद्धुं शक्याः । एवं बाह्येष्वपि भावेषु । सर्वकार्यग्रामस्य हि साधारणसाधारणकर्मणि जातत्वमिष्टं शिष्टानाम् ॥ § 154

अथापि स्यात्, शरीरे दक्षिणेतरगोप्यागोप्यस्थानेषु भवन्तस्तिलकादयोऽवश्यं सुखासुखादिकमुपनयन्तीति सत्संवर्तनीयकर्माधिपत्यादुचितः स्थाननियमः । कुशूले तु बीजविसरेण तेनान्येन वा परिकर्मितभूमावुप्यमाने न कश्चिद् विशेष इति वैषम्यात् न कर्मशक्तिकल्पनमिति चेत् ? § 155

हन्तैवं साक्षादुपयोगदर्शनादर्शनाभ्यां कर्मादिसाधनशक्तिकल्पनाकल्पनयोरल्पीयः किञ्चित्कार्यं जगति कर्मनिर्मेयमनुमन्तव्यमीश्वरादिसाध्यं वा ? न हि शिशुपशुविशेषसाधारणव्यावृत्त्या छागादीनां पुरीषादेर्वर्तुलीकरणेन किञ्चित्प्रयोजनमुपलभसे । अनुपभुक्तविशीर्णेषु वाटवीविटपफलप्रसूनपल्लवादिषु । त एव तिलकादिमन्तः पुरुषाः अपरिचितस्वकीयकायतिलकादयः । परिचयेऽपि वानुदीर्णदुःखदौर्मनस्यादयो दृश्यन्ते मरणमुपगच्छन्त

१ द्वेधा] द्विधा र
१ वेत] चेतनमचेतनं चेति र, पाठोऽस्पष्टः अ
४ श्च] ०क्षेतरः अ
५ दंशेनापि] ०दंगेना० र
५ सा] सा इति नास्ति अ
६ न] पु?तुन र
६ नः] पृथग्जनः इति नास्ति र
७ या] प्रेति नास्ति र
८ न] चैव० र
९ मात्रेण] मात्रात् र
९ न] नकारो नास्ति अ
११ वानां] ०नां सविभक्तमाता० र
११ य] ०कश्चित्कणिकादय० अ
१२ पि] ०दिनामाद्यावयवेष्वपि र
१४ पि] ०गमुपल० अ
१५ मिष्टं] निर्जातत्व० र
१६ स्थानेषु] भक्तः ति० अ
१८ रेण] ०रेणेति र
२२ किश्चित्कार्यं] कार्यं अ
२३ व्यावृत्त्या] साधारणवृत्त्या र[[Reference of note not clear from print.]]
२४ विशीर्णेषु] भुक्तशीर्णेषु र
२६ यः] अपचितस्वकीयतिल० र
२६ येऽपि] चा र

इति कस्तत्राप्युपयोगः ? *सव्यासव्यगोप्येतरस्थानेषु वा स्थवीयस्सु तिलकादिसंभवयोग्यस्थानीयस्य देशस्य भूयसः संभवात् कथमुद्धतिस्थाननियमस्तिलकादीनाम् ? मृगादिषु च वर्णमात्रवैकृत्येन क्वचिदङ्गे दौर्मनस्यादिश- 20a/jnams, 48 ङ्कयाप्यलं किं तेषु कीदृशमुपयोगवर्णनम् ? कियद्वा शक्यमेतादृशमुपदर्शयितुम् ? कियति वा त्वयापि प्रतिविधेयम् ? तत् किं विफलमायास्यसि ? उपयोगाभ्यूहविरहेऽपि प्रतिनियतदेशकालस्वभावेषु भावेषु कार्यभेदोपलम्भः सर्वत्रावान्तरभेदं दुर्लक्ष्यकर्मादिसाधनशक्तिभेदभावितम् । साक्षात् पारम्पर्येण वा दृश्यादृश्यचेतनाचेतनार्थकर्मण्युपयोगिनं योगिभिरप्यवान्तरैरशक्यपरिच्छेदमिदन्तया नियमेन सामान्यतो व्यवस्थापयतीति गलेपादिकयापि स्वीकारयितव्यो न्यायान्वेषी न्यायविदा । तथा च सति कस्यचिदेव बीजस्यापसर्पणप्रत्ययसम्पर्ककर्कशः स्वभावः, अन्येषां तु तद्विशेषविश्लेषमसृण इत्यवान्तरावान्तरविशेषात् स एव बीजक्षणः परम्परयापि प्रकृतकार्योपयोगी, नान्ये बीजक्षणाः । स चावान्तरो विशेषः करस्पर्शादनुमीयमानो न कर्मादिसाधनशक्तिविशेषानभ्यूहादुपयोगविशेषानभ्यूहाद् वा शक्यप्रतिक्षेपः । तिलकादिसंभवादिव देहांशविशेषः, वृक्षाद्यंशविशेषो वा कुतश्चिदेकदेशिकविकारलेशात् । तत्रापि हि विकारबिन्दुस्थानस्यांशस्येदं दृष्टमदृष्टं वा कारणमासाद्योपादानभागविशेषपरम्परयायं स्वभावभेद इदमन्यभागासाध्यमर्थं कर्तुं समर्थ इति विशेषानवधारणेऽप्यस्ति किञ्चिद्विशिष्टं कारणमुपयोगो वाऽन्यासंभवीति सामान्यतो *विकारकारणयोगादङ्गस्य स्वभावभेदनिश्चयः । एवमत्रापि बीजे पुरुषबुद्धिप्रयुक्तकरस्पर्शादस्ति स्वभावभेदः सूक्ष्महेतुफलभेदभागीति सामान्यतो दुर्निवारो निश्चयः । ततः स्वाभवभेदसंभवात् तदेव बीजमुपयुज्यते परम्परयाप्यङ्कुरोपजननानुगुणे विशेषे नान्ये बीजक्षणा इति सिद्धमेतत् । § 156

यत्तूक्तं न खलूपसर्पणेत्यादि । तदेतत् कस्य प्रमाणस्य व्यापारमालोच्यते ? न तावत् प्रत्यक्षस्य, आकारसाम्येन स्थूलैकजातीयतानिश्चयेऽप्यवान्तरभेदस्य सूक्ष्मतयानवसितस्याशक्यनिषेधत्वात् । दृष्टं च तिक्तेतरत्रपुषादौ सदृशाकारे स्थूलजातिभेदवत्यपि प्रस्खलदध्यक्षमेकावसायजननात् । त-

१ योगः ] इति तत्रा० अ
१ * ] मध्यामध्य० र
३ ङ्गे ] ०दंशे अ
४ तेषु ] ०प्यलङ्कितेषु र
५ यितुम् ] ०मुपपादयितुं र
५ सि ] ०मायास्यपि र
६ हेऽपि ] अपीति नास्ति र
६ भावेषु ] भावेषु इति नास्ति र
८ योगिनं ] चेतनार्थकर्मिण्यु० र
९ या ] परिच्छेदन्तया र
१० न्यायान्वेषी ] न्यायान्वेषीति नास्ति र
१२ विशेषात् ] इत्यवान्तरविशेषात् अ
१६ लेशात् ] ०नेषते र
१७ यायं ] ०दानता वा विशेष० र
१७ भेद ] इममद्य भागो र
१९ वाऽन्या ] ०ऽन्यो र
१९ * ] ०विका करण० अ
२० बीजे ] बीजेषु रूप० र
२० हेतु ] हेत्विति नास्ति अ[[Reference of note not clear from print.]]
२२ विशेषे ] जननगुणे विशेषे अ, ०विशेष० र
२६ त्वात् ] ०ऽवसित० र

तृतीयविकल्पे त्वयमर्थः स्यात्, येनैव रूपेणाङ्कुरं करोति किं तेनैव क्षितिमिति ? येनैव सहकारिणाङ्कुरं जनयति किं तेनैव भुवमिति ? एतच्च कदोच्यते यदि बीजस्याङ्कुरकरणे निर्ज्ञाते नियतरूपः कश्चित् सहकारी व्यापारवान् परिनिष्ठितोऽन्यकरणे सन्दिग्धव्यापारः । न चैवं शक्योपदर्शनम् । § 175

अथैवं सति बीजस्याङ्कुरकरणे पृथ्वीपाथःप्रभृतयः सहकारिणस्य एव किं तस्य पृथ्वीजननेऽपीति विकल्पार्थः ? तेनापि नोपयोगः । सर्वेषां सर्वत्र परस्परं सहकारिभावस्य सुप्रसिद्धत्वात् किमत्र प्रश्नेन ? न चोत्तरः प्रबन्धोऽत्रानुरूपः । *नहि तदापि कारणभेदाभेदाभ्यां कार्यभेदाभेदाविति श्लिष्टता 22b/jnams काचित् । तस्मादीर्ष्याशल्यकदर्थितनिरर्थकैः प्रलापैः परमाकुलयितुमिच्छन्ति न्यायविन्मानिन इत्यलमत्र निर्बन्धेन । § 176

अपि चापूर्वोऽयमसाधारणानैकान्तिककीर्तनप्रकारः । विद्यमानो हि भावः साध्येतरयोरनिश्चितान्वयव्यतिरेको गन्धवत्त्वादिवदसाधारणो युक्तः । प्रकृतव्यापकानुपलम्भबलाच्च सर्वथार्थक्रियैवासतीति तत् कथमसाधारणानैकान्तिकी भवितुमर्हति ? *असिद्धिदूषणं तु वक्तुमुचितम् । तत्र चोक्तमेव । § 177

अथ क्षणिकत्वे व्यापकाभाव इत्युक्तम्, तन्न सर्वथासत्त्वमिति चेत् ? एवं तर्हि विद्यमानैवार्थक्रिया क्षणिकादेव व्यावर्तते, ततो नियमेनाक्षणिके विश्राम्यन्तीति तेन व्याप्यत इति विरुद्धताप्यस्तु । § 178

अथ साक्षादक्षणिके तस्या बाधकस्य साधकस्य वा विरहात् सन्देह इति चेत् ? विद्यमानत्वे क्षणिकाद् व्यावृत्तिरेव साधनी तस्याः सन्देहमनवकाशयति । विद्यमानतासन्देहे च सन्दिग्धासिद्धिरेव दूषणम् । § 179

किं च प्रकृतव्यापकानुपलम्भस्य क्षणिकवदक्षणिकेऽपि सामर्थ्यानपायात् कथं *बाधकसिद्धिरित्यसिद्धिरेव सर्वथायाता । शक्यं हि नित्येऽपि वक्तुं न सहकारिणि सापेक्षस्य करणमुपकाराभावात् । न निरपेक्षस्य, तेन 55 विना करणात् । स्थिरं च बीजमङ्कुरजनकेनैव रूपेण क्षितिमुत्पादयति भिन्नेन वेत्यादि यदा विसदृशक्षित्यादिजन्मोपालम्भः प्रदीपोऽपि चाक्षणिक एव भवताम् । तत्र वर्तिविकारतैलक्षयावेकेन भिन्नेन वा रूपेण क्रियेतामिति समानम् । यस्तु समाधिः सहकारिण एव भिन्नाः तस्य स्वरूपभेद इति, एवं

---

२ तेनैव] क्षितिमिति...किं तेनैवेति नास्ति र
३ निर्ज्ञाते] कारणेनिर्ज्ञाते र
८ त्वात्] स्वप्रसिद्ध० र
९ *] न कारण० र
११ न्धेन] अतिनिर्बन्धेन र
१४ लाच्च] ०लम्भनाच्च र
१४ तीति] वासतीत कथ० र
१५ *] प्रसिद्ध० र
१८ णिके] नियमेन क्ष० अ
१९ न्तीति] ०म्यन्ती तेन अ
१९ त] व्याघात अ
१९ स्तु] विरुद्धताऽस्तु अ
२४ *] बाधकासिद्धि० अ
२८ ताम्] वाऽक्षणिका च भवता र
२९ म्] समानमिति नास्ति र

च स्यात् । अयोगव्यवच्छेदेन त्वेककालकार्यकरणमिति कालान्तरवतोऽपि कार्यस्य करणमविरोधि । तस्मात् कुशूलादिसर्वावस्थासमानस्वभावस्यापि *तदतत्कालकार्यजननमुपपन्नम्, भिन्नदेशानेककार्यार्जनवदिति । § 190

तदेतन्न सङ्गतम्, *बाधकभावाभावाभ्यां विशेषात् । यत्तु तत्कार्यत्वं तद्देशतासाधनायोपन्यस्तं तद्विपर्ययबाधकप्रमाणाभावादसाधनमेव । अन्वयव्यतिरेकसमधिगम्यश्च कार्यकारणभावः । तौ च यथा तद्देशकार्यजन्मनि दृष्टौ तथा भिन्नदेशकार्यसंभवेऽपि । न चैवं स्थितेनापि कारणेन सह तत्कालकार्यस्यान्यकालकार्यस्य वान्वयव्यतिरेकौ समानाविति युक्तम् । कालान्तरेऽपि तदेव कारणमनुवर्तत इति न प्रत्यभिज्ञातोऽन्यत्प्रमाणम्, सा च दूषितेति कथं स्थिरेणान्वयव्यतिरेकग्रहणं कार्याणां कालभेदवतामिति नायं न्यायः समानः । ततो विपर्ययबाधकविकलतया देशभेदे भेदसाधनो हेतुर्यदि स्वसाध्यसाधनसमर्थः किमायातं तद्बलवतः कालभेदे भेदसाधनस्य । नहि वृषभस्यादोहयोग्यत्वे धेनोरपि तथेति युक्तम् । § 191

अस्तु वा देशभेदेन भेदसाधनस्यापि विपर्ययबाधा बलम्, कालभेदे भेदसाधनस्य तु किमेतावता दूषणम् ? अनैकान्तिकत्वमुपपाद्यत इति चेत् ? किमयं मन्त्रपाठः ? कदाचिज्जननसमर्थस्याजननस्यान्वयदर्शनात् सन्दिग्धविपक्षव्यावृत्तिकत्वमभिमतमिति चेत् ? तथापि किमनेन श्रमेण ? समर्थं च
58 स्यात्, न च जनयतीतीयतैव तत् सिद्धेः । देशोदाहरणेन संशयपुष्टिः क्रियत इति चेत् ? यदि विपर्ययबाधा बलमस्य न पुष्टापि संशयमनुल्लङ्घयन्त्या किञ्चित्, विपर्ययबाधावैधुर्ये तु संशयमात्रेणापि हेतोर्विपर्यासनात् किमपरं पुष्ट्या ? यदि च तन्मात्रं विवक्षितम्, तदा विपर्ययबाधकेन निरस्तेऽस्मिन् किं पुनरुपन्यासेन ? § 192

अथ कालदेशयोः सर्वत्र समानन्यायोपलब्धेरेकयोगक्षेमत्वाद् देशभेदवदेव कार्येण कालभेदवतापि न हेतुभेद इत्युच्यते ? तदप्ययुक्तम् । तथाहि न परमाणोः कालव्याप्तिसदृशी देशव्याप्तिरिष्यते नित्यवादिभिः ।
24a/jnams नापि विद्युदुद्योतस्य देशव्याप्तिसदृशी कालव्याप्तिरेवं घटादेरपीति कथं सर्वत्र समानन्यायता ? न चान्यत्र समानन्यायतादर्शनेऽपि सर्वत्र तथाभावः, प्रस्तुते वैपरीत्यसंभवे बाधकाभावात् ॥ § 193

१ च्छेदेन ] चैक० र
२ विरोधि ] विरोधिते र
३ * ] तदत्कार्य० अ
४ * ] ०भावभावा० र
६ श्च ] ०गम्याश्च र
७ दृष्टौ ] जन्मिभिर्दृष्टौ र
७ स्थितेनापि ] क्षितिनापि र
८ स्य ] स्यान्यकालकार्य० इति नास्ति र
११ भेदे ] भेदे इति नास्ति र
१३ हि ] वृषस्य अ
१६ नात् ] ०स्यानुप० र
१८ णेन ] देशोपहरणेनु० र
१९ स्य ] बलस्य प्रष्टापि अ
२० न्त्या ] न किश्चित् अ
२१ पुष्ट्या ] प्रष्टा अ
२४ देव ] ०वतेव अ
२४ न ] नाहेतु० र
२६ स्य ] विद्यौद्योतस्य अ
२६ व्याप्तिरेवं ] घण्टा० र

योरेकत्वमात्रविवक्षया जातिनिर्देशः, पूर्वा परा वा पुनरेकानेका वा क्रिया स्यात् । एकदा क्रियापक्षे वोभयमप्यक्रमशब्दवाच्यतां नातिपतति । तत्राप्यनेकक्रियैव तात्त्विकी, पुञ्जात्पुञ्जोत्पत्तेस्तात्त्विकत्वात् । *शङ्कामात्रेणानवक्लृप्त्या वा एकक्रियाभिधानम् । अतएव यौगपद्यशब्देन तस्याप्युपलक्षणादक्रमसंगृहीत एवार्थो यौगपद्यपदेऽप्यवगन्तव्यः शास्त्रे । एतस्य च कार्यगतस्य प्रकारद्वयस्य कर्तुः क्षणभङ्ग एव सङ्गतिरित्यत्यन्तीभाववधारणया वृत्त्या नित्याद् व्यावृत्तिरुक्ता । प्राधान्येन क्षणभङ्गसङ्गतिरित्यक्षरं तु नित्यादिव क्षणिकादपि सा व्यावृत्तिः शक्नोति लक्षयितुम् । अथवा व्याप्यस्य वा तत्रैव भाव इत्यनुकरणार्थम् । एतेन नित्यस्य क्रमयौगपद्याभ्याम् अर्थक्रियाविरोधात् तल्लक्षणं सत्त्वमवहीयते, अतः क्षणिकत्व एव विश्राम्यति तेन व्याप्यत इति क्रमयौगपद्यलक्षणव्यापकानुपलम्भाद् विपर्यये बाधकात् सत्त्वस्यार्थक्रियाशक्तिलक्षणस्य क्षणिकत्वेन व्याप्तिसिद्धिरित्युक्तं भवति । तत्र कर्तृधर्मो यदार्थक्रिया, तदार्थक्रिया शक्तिरिति वा व्यवहार एकार्थः । केवलं कर्मधर्मस्य क्रमयौगपद्याभ्यां व्याप्तौ कथं कर्तृधर्मस्य व्याप्तिव्यवहार इति स्यादाशङ्का । तत्रापि क्रमाक्रमिककार्यविषयतया व्याप्यमाना कारणशक्तिः क्रमाक्रमव्याप्तेत्युच्यते व्यवहारलाघवार्थमिति ॥ § 211

एतेन कृत्वा करणलक्षणं क्रममाश्रित्य क्षणिकादयं क्रमो निवर्तयितुं शक्य इत्यसारप्रबन्धं त्रिलोचनचोद्यं निरस्तम् । अर्थक्रियाविरोधादित्यत्र चार्थक्रिया कर्तृधर्म एव वेदितव्यः, तल्लक्षणं सत्त्वमिति वचनात् । § 212

अथवा लक्षणमुपलक्षणं न स्वभाव इति कर्मधर्मोऽप्यस्तु । तदत्र पक्षे क्रमाक्रमाभ्यामुपलक्षितार्थक्रिया नित्यस्य विरुध्यत इत्यर्थः । प्रथमपक्षे तु क्रमाक्रमेणोपलक्षितार्थकारित्वं नित्यस्य विरोधीत्यर्थः । क्रमयौगप-
65 द्याभ्यामिति तु विशेषणान्न शेषाभ्यनुज्ञाशङ्का, हेतुत्वार्थमुपादानात् । यस्मात् क्रमाक्रमाभ्यामेवार्थक्रिया ततो नित्यस्य विरोधिनी, क्रमाक्रमातिक्रमादित्यर्थात् ॥ § 213

कः पुनरत्र विरोधः ? न तावत् सहानवस्थानमुभयोवस्तुत्वप्राप्तेर्नित्यं सदेव स्यात् । § 214

नापि द्वितीयः । नित्यं हि तद्विपरीतेनानित्येन विरुध्येत । क्रमाक्रमव्याप्ता *चार्थक्रिया अनर्थक्रिययैव विरुध्यत इति चेत् ? प्रमाणबलेन

१ वा ] ०रेका वा र
२ तां ] ०तार्थाति अ
३ * ] ०पात्रेणा० र
५ व्यः ] तस्या अप्यप० र
६ या ] ०न्तन्तीभा० र
८ व्यावृत्तिः ] साध्यावृत्तिः र
१० तेन ] ०म्यत्तेन र
१२ व्याप्तिसिद्धिरित्युक्तं ] ०रितीत्यु० र
१४ स्य ] धर्मधर्मस्य र
१८ क्य ] शक्येति नास्ति अ
१८ चोद्यं ] ०चनाद्यं अ
१९ नात् ] तल्लक्षण...वचनादिति नास्ति र
२१ स्य ] नित्यस्येति नास्ति र
२३ तु ] ०षणान्नर्थो ?शे० अ
२४ तो ] ०क्रियातो र
२७ स्यात् ] न्स्यात् र
२८ रीतेनानित्येन ] नित्येना० र
२८ विरुध्येत ] विरुप्यत० र
२९ * ] वार्थ० र
२९ यैव ] ०क्रियैव र

। तस्मान्न सर्वात्मना साधारणो दृष्टान्त इति वार्तायामपि साध्यसाधनाभ्यां साधारणस्तावदवश्यकर्तव्यः । न हि व्याप्तिप्रदर्शनादन्यो दृष्टान्तस्य अर्थः, न चानुपदर्शितेन दृष्टान्ते साध्येन व्याप्तिसाधनमादर्शितं भवति । न चैकावयविसिद्ध्या साध्यशून्यतापरिहारो हारी । शरीरबुद्ध्यादिराशितया नर्तक्याऽवयवित्वाभावात् । शरीरापेक्षया त्ववयविदूषणमेव जागर्ति । आत्मापेक्षायां तु सोऽद्यापि न सिध्यति, विपर्ययबाधकाभावाच्च नानेकान्तशान्तिः । ममेति प्रतिसन्धानं हि विकल्पतया अनाद्यविद्यावशादपि प्रत्यभिज्ञानवत् संभवत्कथमेकसंबन्धाधीनतां स्वीकुर्यादिति ? § 256

तदेवं यथास्मृति कर्मफलसंबन्धादिकमशेषमवस्थातारमन्तरेणापि न विपत्तिमासादयति क्षणिकवादिनः, तथा कार्यकारणभावबुद्धिरपीति न साधारणानेकान्तशङ्काकलङ्कः । § 257

शङ्करस्तु वाचाटतया किमपि नाटयति । तथा हि, कदाचिदुपलम्भपूर्विका धूमबुद्धिः तेजःकार्यमिदं कपोतकण्ठधूसरं वस्त्विति निश्चयमुत्पादयति, कदाचित् तदुभयोपलम्भपूर्वकस्तदनुपलम्भः । अनुपलम्भोऽपि प्रतियोगिवस्तूपलम्भस्वभावतया अध्यक्षरूप एव अन्वयः पुनरनुपलब्धिनिष्ठायां विहित इति तत्रैवावधार्यः । अन्वयव्यतिरेकग्राहकप्रत्यक्षानुपलम्भनीतिरपि त्रिकपञ्चकचिन्तायां दर्शितेत्यास्तां तावत् । § 258

32b/jnams प्रकृतं तू ब्रूमः । उभयथापि क्रमभाविनीषु बुद्धिषु *पूर्वपूर्वया संस्कारविशेषाधानादन्तिमा बुद्धिरेतस्येदं कार्यमिति मतिमुत्पादयितुं पूर्ववन्निर्वहतीति नावस्थितस्यानुरोधः प्रतिसन्धातुः । § 259

यत्पुनरुक्तम्, व्यतिरेको मनोरथस्याप्यविषय इति, तदतिसाहसम् । नहि यदेव प्रत्यक्षं वस्तुग्राहिं वस्तुद्वयनिवृत्तौ तदेव तयोर्व्यतिरेकमपि गृह्णातीत्युच्यते, किं तु तद्विविक्तप्रतियोगिवस्तूपलम्भस्वभावं प्रत्यक्षान्तरमेव । ततो यदुक्तं तच्च नास्ति तेन च प्रतिपत्तिरिति न न्याय्यमिति क्वोपयुज्यते ? न चैवं स्वसंवित्तिवादोपलम्भसंगतिः । यदप्युक्तं पूर्वोत्तरयोः क्षणयोः
80 संवित्ती, ताभ्यां वासना, तया हेतुफलाध्यवसायी विकल्प इति चेत् ? तत् किमिदानीं यत्किञ्चिदाशङ्कितेन वक्तव्यमित्येवं विधिरनुष्ठीयते भवता ? विकल्पो हि गृहीतानुसन्धानमतद्रूपसमारोपो वा स्यात् ? न तावत् पूर्वः पक्षः, अदृष्टान्वयव्यतिरेकस्य पुरुषस्य हेतुफलभावाग्रहेऽनुसन्धानप्रत्य-

१ पि ] ०मसि र
२ हि ] प्रेति नास्ति र
६ शान्तिः ] ०चानेकान्त० र
८ त् ] सम्भवमत्र कथं र
८ तां ] ०म्बन्धिताधीन० र
१० ति ] विद्यातोतमा० र
१२ ति ] नटयति र
१३ पूर्विका ] वेत्यधिकम् र, धामधूम० अ
१६ पि ] रीति अ
१८ * ] पूर्वया र
१९ न्तिमा ] अस्ति सा अ
२२ देव ] यावदेव र
२२ निवृत्तौ ] निवृत्तं अ
२५ प्युक्तं ] तदप्युक्त० र
२५ योः ] ०र्वोत्तर० अ
२७ मित्येवं ] विधे अ

र्तव्य इत्येवंविधिमनुष्ठितोऽनेन । न चेदानीमाकारदूषणप्रतिविधेरवसर इति नेदं प्रतिषिध्यत इति ॥ § 269

ननु तथापि, § 270

मतिः साकारा चेन्न च भिदि मिथो वेदनमतः स्फुरत्येकैवासौ
तदिह न विरोधः प्रभवति ।
अतः शक्ताशक्तोऽप्यभिदिति निरस्ता क्षणिकता न वाच्यो
दोषश्चावयविनि न वा साकृतिनयः ॥§ 272

नन्वत एवोक्तं नायं तत्प्रतिविधेरवसर इति । न हि तदसिद्धिरवयविसिद्धिर्वा बाधिकास्माकम् । § 273

नित्यत्रयानुगमनादिगुणेन कान्तः सौत्रान्तिकस्य समयोऽपि न
बाधितोंऽशे ।
नोचेन्न पुद्गलनिराकरणेन बौद्ध सिद्धान्तबाधकृत एव
कृतापराधः ॥§ 275

तस्मात्, § 276

धियः साकारत्वं यदि मम य एवैष समयो भवेद् दुष्टो
मानाभ्युपनतहतिः स्यात्कथमिव ।
प्रमासिद्धं तच्चेद् भवतु धिय एवैष समयो
*बहिश्चित्रेऽप्येकस्थितिरिति विलुप्तं खलु बहिः ॥§ 278

83

अर्थक्रियाभेदनान्तरीयको ह्याकारभेदः पदार्थेषु । तत्र यद्याकारभेदेऽपि नार्थक्रियाभेदः, हन्त प्रतिभासमात्रभेदान्नातिरिक्तं किञ्चिदिति बाह्यपदार्थापलाप एव प्रसक्तः । तदवश्यमनेन बाह्यवस्तुन आकारभेदाद्भेद एव स्वीकर्तव्यो, बुद्धिर्भिद्यतां मा वा । नहि समकक्षतापि धियोऽधिगन्तुमलम् । अन्यथा स्वसंवेदनमन्यप्रकाशनं च बाह्यस्यापि प्रसज्यमानं ग्राह्यग्राहकभावमेव विप्लावयेत् । तद् यदि प्रमाणसिद्धं बुद्धेरेकत्वं चित्राकारायास्तस्या

१ नुष्ठितोऽनेन] ०वं चिरमनु० र
२ त] प्रतिबध्यत० अ
४ तिः] साकाचे र[[Reference of note not clear from print.]]
५ यः] कृतिर्नयः अ
६ हि] तदा० र
८ बाधितोंऽशे] ०ऽङ्गो अ
११ यो] समय र
१२ मासिद्धं] प्रणे?सिद्धं र
१२ धिय] भवे?य र; भतु धिय अ[[Notes misnumbered: eight according to marks in text, but only seven are in the notes. I think this one was mistakenly merged with note ६.]]
१२ *] ०श्चितेत्तेप्ये० र
१५ क्तः] प्रयुक्तः र
१५ एव] आकारभेद एव र
१६ तापि] ०ताभिदं अ
१७ नं] ०दनन्या?प्रका० र
१८ त्वं] ०चित्राक्षरोयास्त० र

नापि द्वितीयः कल्पः तत्रापि हि व्यापकनिवृत्तिसहिता व्याप्यनिवृत्तिः व्यतिरेकशब्दस्यार्थः । *सा च निवृत्तिर्गमकाङ्गत्वादवश्यं प्रतिपत्तव्या भवतीति यद्यनुभवाद् गम्यते तस्य हेतुः स्यादहेतोरग्राह्यत्वादिति हेतुरनैकान्तिकः स्यात्, व्यतिरेकस्यानुभवकारितया भावरूपत्वे साध्यकोटिनिक्षिप्तत्वात् । अन्वयव्यतिरेकयोरभावादसाधारणो हेतुरगमकः । तस्माद् व्यतिरेकोऽवश्याङ्गीकर्तव्योऽवश्यज्ञातव्यश्च ज्ञातव्यत्वे तज्ज्ञानप्रसङ्गो दर्शितः । § 309

स्यादेतत् । व्यतिरेको न साक्षात्कारिविज्ञानग्राह्य इष्टो यतः साक्षात्कारिणो विज्ञानस्य जनकः स्यादपि तु विकल्पयितव्यः, न च विकल्प्यमानोऽर्थः स्वकीयसमनन्तरप्रत्ययाधीनोत्पादस्य विकल्पस्य हेतुरुपपद्यते, 36a/jnams
तत् किमुच्यते हेतुरनैकान्तिक इति ? § 310
89

तदप्यसङ्गतम्, यतः सर्व एव विकल्पो न चतुष्टयीं गतिमतिक्रामति । तथा हि कश्चिदनुभवपृष्ठभावी नीलादिविकल्पः, अपरः सन्दिग्धविषयः पिशाचादिविकल्पः, अन्यः पुनरसदर्थः शशविषाणादिविकल्पः, विकल्पः पुनरिह कश्चिल्लिङ्गजः । तत्र लिङ्गजादारभ्य सर्वो विकल्पः अवस्तुनिर्भासाद् इति ब्रुवता प्रत्यक्षाभ उक्तः, यतो वस्तुप्रतिभासं प्रत्यक्षं, स्वलक्षणाभावे तत्प्रतिभासप्रच्युतेः । न चैवं विकल्पः, तत्प्रतिभासस्य वस्तुन्यननुरोधात् । तस्मात् प्रत्यक्षाभो विकल्पः । लिङ्गजस्तु यथाध्यवसेयमर्थं प्रापयतीति प्रमाणम् । न च व्यतिरेको विकल्प्यमानो लिङ्गाभावाल्लिङ्गजेन विकल्पेन विकल्प्यते अनुभवपूर्वकस्य च विकल्पस्य पारम्पर्येण वस्तुजन्मनोऽपि न वस्तुनि प्रामाण्यम्, अनुभवस्यैव प्रमाणत्वात् । अनुभवश्च व्यतिरेकाश्रयः संप्रत्येव निरस्त इति पारिशेष्यादसदर्थः सन्दिग्धवस्तुको वा विकल्पो निश्चाययतीति सत्त्वमविद्यमानव्यतिरेकं सन्दिग्धव्यतिरेकं वा न क्षणिकत्वसाधनाय पर्याप्तम् । § 311

नापि तृतीयो विकल्पः । यतः क्रमयौगपद्यमक्षणिकात् सत्त्वमुपादाय व्यावर्तमानं स्वेन व्याप्येन सह क्षणिकत्वे व्यवतिष्ठत इति प्रतिबन्धसिद्धिर्व्यतिरेकसिद्धिपूर्विका गम्यते, व्यतिरेकश्च पूर्वोक्तेन क्रमेण निराकृत इति । § 312

तदेवम्, § 313

नित्यं नास्ति न वा प्रतीतिविषयं तेनाश्रयासिद्धता हेतोः
स्वानुभवस्य चाक्षतिरतः क्षिप्तः स्वपक्षोऽपि च ।

---

१ निवृत्तिः] ०निवृत्ति...व्याप्येति नास्ति र
२ *] सनिवृ०...भवन्ती यद्य० र
३ ते] भवाज् जन्यते अ
५ स्माद्] ०रेकोऽस्याङ्गी० र
६ श्च] ज्ञातव्यश्चेति नास्ति र
६ त्वे] ज्ञातव्ये र[[Reference of note not clear from print.]]
९ मानोऽर्थः] ०समन्तर० अ
९ स्य] अत्र पत्रक्रमो भ्रष्टः अ
१६ नुरोधात्] वस्तुष्वन० अ
१९ च] वा र
१९ न] नकारो नास्ति र

हितत्वनिषेधः शशविषाणे इत्येवंप्रकारो भ्रमः । ततो यथा शब्दे चाक्षुषत्वादनित्यत्वं संभावयन्नसिद्धत्वेन निषिध्यते तथेहापि स्यातां शङ्कानिषेधौ, न विरोधः । तस्माद् वस्तुनीवावस्तुन्यपि कस्यचिद्धर्मस्य विधिनिषेधव्यवहारो दुर्वारः, आहत्य विप्रतिपन्नानामपि शास्त्रकाराणां निषेधवाक्येनैव स्वीकारात्
94 । तत्रेदानीमवस्तुषु बन्ध्यासुतपर्यन्तेषु कथं धर्मित्वम् ? प्रतीत्यभावे कथं व्यवहारः ? प्रतीतिजनकत्वे कथं न वस्तुत्वम् ? न च वचनमात्रप्रमाणमुपादेयमिति यः कश्चिद्धेतुरुपादीयते, स सर्वः कथं नाश्रयासिद्धः ? तदेतदायातम्,

यश्चोभयोः समो दोष इत्यादि । *[Note: ]* § 340

यदि च निश्चितावस्तुभावेष्वपि नैते दोषाः, तत् किं साधनात्प्रागसन्दिग्धसत्ताके नित्ये भविष्यति ? कः पुनरत्र परमार्थः ? न ह्यवस्तुनि कस्यचिद्धर्मस्य विधिनिषेधव्यवहारः शक्यपरिहारः प्रामाणिकस्य । न चैते दोषाः सानुषङ्गिण इति चेदुच्यते, न तावदवस्तुनो धर्मित्वाभावः । यत्रैव हि इदमेवमिति परामर्शः तदेवेदमित्यनेनाकारेण धर्मि । एवमिति धर्मविशेषयागः । यथा घटो नील एवं बन्ध्यासुतो न वक्तेति घटस्य नीलत्वमिव बन्ध्यासुतस्य वक्तृत्वं धर्मः प्रतोयत इति न धर्मित्वाभावोऽभावे । केवलं कश्चिद्धर्मो वस्तुनियता नीलत्वादिः, कश्चिदवस्तुनियतः सर्वोपाख्याविरहादिः, कश्चिदुभयसाधारणोऽनुपलम्भमात्रम् । तत्र वस्तुधर्मिणावस्तुधर्मित्वनिषेध इति युक्तम् । न तु धर्ममात्राणाम्, स्ववचनविरोधस्य बाधकत्वात् । प्रतीत्यभावेन व्यवहार इत्यप्ययुक्तम् । न पुनरुभयारेकप्रकारैव प्रतीतिरङ्गं व्यवहारस्य । वस्तुनो हि स्वसामर्थ्यभाविनी प्रतीतिः । विकल्पश्चाध्यक्षलिङ्गाभ्यां पारम्पर्यकार्यः । अवस्तुनस्तु सन्दिग्धवस्तुभावस्य वा विकल्पमात्रम् । सामर्थ्याभावे हि तयोरभावे विकल्पमात्रमपि यदि न तत्प्रतीतिरवस्थाप्यते सर्वथाव्यवहार्य एव स्यात् । इष्टश्च व्यवहारः, अतो *विकल्पनमात्रं तत्र प्रतातिः, तदुपस्थापितमेव च तयोः स्वरूपं नान्यत् । यथा वस्तुनः प्रत्यक्षानुमानोपनीतमेव स्वरूपम्, एवमवस्तुनः सन्दिग्धवस्तुभावस्य वा विकल्पापस्थापित एवात्मा नान्य इति । नातः समयादङ्गमाकषन्तः सन्ता भवितुमर्हन्ति । § 341

१ मः] क्रमः अ
३ पि] ०बाधस्तुन्य० र
४ त्य] अहृत्य र
१० च] यदि विनिश्चि० र
१० किं] प्राक् सन्दि० र
११ त्ताके] सत्ताको अ
११ ति] भविष्यन्ति र
१३ दोषाः] नानुषङ्गिण अ
१४ कारेण] तदेवमित्याका० र
१६ र्मित्वाभावोऽभावे] ०ऽभावो र
१७ हादिः] ०विरहः र
१८ म्] मानं र
१८ त्र] ०धर्मेण...स्ववचन० इति पतितम् र
२० म्] ०त्यपि अ
२० कारैव] ०प्रतिपत्तिरङ्ग० र
२२ कार्यः] ०ल्पश्च...कार्यः इति पतितम् र
२३ न] तत्र र
२४ *] ततो र
२५ त्] नान्यतः र

विरोधिनो विरोध इति कृत्वा कल्पितो विरोधी तस्येति वा, कल्पितस्य हि विरोधिनो विरोधोऽपि कल्पित एव न वास्तव इत्येव भवत्पौरुषेण साध्यमानमीक्षामहे । तस्मात्तस्य कल्पितस्य विरोधस्य विरोधिनो वास्तवत्वेन सह यो विरोधः सोऽपि कल्पितविरोधिविरोधः सिद्धः । तस्य वास्तवत्वे स्ववचनविरोधः । अवास्तवत्वे दूषणमुक्तमेव । § 352

अपि च । विरोधो नामैकत्र द्वयोः संवासनिषेधार्थमर्थ्यते । न तु द्वयोर्वस्तुत्वसिद्धिर्नाम विरोधफलम् । यत्र तु द्वयोर्वस्तुत्वसिद्धिस्तत्र सामर्थ्यादेकेन वस्तुना वस्त्वन्तरतिरस्कारात् क्वचिद् देशे, यथा सहानवस्थाने यथोक्तं प्राक् । प्रकृतस्तु विरोधो धर्मयोरेकत्र धर्मिणि सद्भावनिषेधफलः । § 353

तत्र यथा द्वावपि धर्मौ सन्तौ निषिध्येते, यत्र नीलत्वं न तत्रानीलत्वम् । अतो न नीलानीलमेकमिति । तथा सदसत्त्वरूपावपि विप्रतिषिद्धौ 40a/jnams धर्मावेकत्र धर्मिणि समारोपितौ प्रतिषिद्धावेव । न हि जनन्याः तनये बन्ध्यातनयत्वमारोपितं तत्त्वतोऽसदिति न निषेध्यम् । बन्ध्यातनये वा विकल्पैकगोचरे जननीतनयत्वमारोपितं न निषेध्यम् । न हि जननीतनयो बन्ध्यातनयो वैकात्मा, तावतैव विरोधकार्यपर्यवसनात्, किमपरेण विरोधनाम्ना यो वस्तुधर्मावनपेक्ष्य नात्मलाभमासादयति ? एवं यत्र नित्यत्वं न तत्र क्रमयौगपद्यवत्त्वम्, यत्र क्रमयौगपद्यवत्त्वं तत्र न नित्यत्वमतो न नित्यं क्रमयौगपद्ययोगि परमार्थतः । ततश्च सत्तायुक्तमपि नैव नियमेन परमार्थतः । ततः क्षणिक एव विश्राम्यत् तदायत्तसत्ताकमेव सत्त्वमिति सत्त्वात् क्षणभङ्गसिद्धेरविरोधः । यदि चैवमपि विरोधव्यतिरेकप्रतिसन्धानेन मातृमोदकक्रमेण गृहीत्वा गिरिकुहरकोणमाविश्य घोषयितुमिच्छसि चेद्, घोषय । न पुनरस्मदारब्धसिद्धिप्रतिबन्धे किञ्चिदुपयुज्यसे । तदलमभिनिवेशपरवशीभूय वास्तवा एवैते विरोधादय इत्येव साधु । ननु नित्यत्वं क्रमयौगपद्यवत्त्वं च विरुद्धौ धर्मौ विधूय नापरो विरोधो नाम, कस्य वास्तवत्वमिति चेत् ? तदपि यत्किञ्चित् । न हि धर्मान्तरसंभवेन विरोधस्य पारमार्थिकत्वं ब्रूमः । किं तु 99 यतो विरुद्धौ धर्मौ धर्मान्तरसंभवेऽपि हि यदि न विरुद्धौ  न पारमार्थिकोऽपि

१ विरोधी ] कल्पितवि० र
१ वा ] वेति नास्ति र
२ हि ] हीति नास्ति अ
४ विरोधः ] विरोधे विरोधयोर्विरोधः र
६ योः ] सन्धास न ? अ
७ सिद्धिर्नाम ] ०न्त्वाश ? र
१० त्र ] तत् अ
१० न ] नीलत्वं तत्रा० र
११ था ] सदसत्ताव० र, सदसन्ता ? अ
१३ वा ] च र
१५ तैव ] विरोध० इति नास्ति अ
१६ पेक्ष्य ] पेक्षाना०
१७ न ] यत्र...तत्र नेति नास्ति र
१९ त् ] श्राम्यतु र
१९ त्त्वात् ] सत्त्वादिति नास्ति र
२० पि ] ०रेकं र
२० न्धानेन ] प्रतिबन्धानवास्तसान्
२१ य ] पोषय र
२३ नु ] साधननु ? र
२३ नु ] ०मानपरो र
२६ र्मौ ] विरुद्धो धर्मो र
२६ वेऽपि ] न धर्मान्तरेऽपि र[[Reference of note not clear from print.]]
२६ मार्थिकोऽपि ] अपीति नास्ति र

नासिद्धे भावधर्मोऽस्तीति
प्र० वा० ३. १९०§ 359

वाच्यम्, तदप्याश्रयासिद्धिचोद्यस्य दूरीकृतत्वान्निराकृतम् । असतोऽपि धर्मित्वसाधनात्, अवस्तुनि विकल्पस्य प्रतीतिव्यवस्थासिद्धेश्च व्योमादिस्व-रूपाप्रतीतिरपि परिहृता । § 360

स्यादेतत्, यदि विकल्परूपां प्रतीतिमाश्रित्याश्रयासिद्धिपरिहारः स-त्तासाधनेऽपि समानम्, ततः कथमुच्यते नासिद्धे भावधर्मोऽस्तीत्यादि ? क-थं चात्मनो विभुत्वसाधनं सर्वत्रोपलभ्यमानगुणत्वमाश्रयासिद्धाबुदाहियत इति चेत् ? साधनानुरोधादुभयत्रापि हि भावधर्म एव हेतुरुपात्त आशङ्कितश्च । न च भावधर्मस्यावस्तु धर्मी भवितुमर्हति । न हि धूमशिंशपात्वादयोऽव-स्तुनि वसन्ति । तस्माद् यत्र भावधर्मः साधनं तत्र नियमेन वस्त्वेव धर्मी । न च विकल्पमात्रविषयस्य वस्तुताश्वासः, अवस्तुन्यपि विकल्पमात्रान-पायात् । ततो वस्तु धर्मीकुर्वता प्रत्यक्षानुमानरूपे च सिद्धिरभिधातव्या । तदनभिधाने तु विकल्पमात्रगोचरितोऽर्थः सन्दिग्धसत्ताको निरस्तसत्ताको वा धर्मीक्रियमाणः कथं वस्तुतया निश्चितः कृतः स्यात् ? तथा च सति यावान् वस्तुधर्मो हेतुः सर्वोऽसौ नाश्रयासिद्धिमतिक्रामति, एकत्र सन्देहाद-न्यत्र विपर्ययात् । ततः प्रत्यक्षानुमानाभ्यां वस्तुविषयाभ्यामसिद्धे भावधर्मो न हेतुरस्त्याश्रयासिद्धत्वादिति युक्तमेतत् सत्तासाधने । असत्तासाधने त्व-वस्तुधर्मो हेतुरवस्तुनि विकल्पमात्रसिद्ध एव नाश्रयासिद्धिदोषेण दूषयितुं शक्यः । न हि तस्य वस्त्वाश्रयापेक्षा, अवस्तुधर्मादेव । न च तदाधार-स्य प्रत्यक्षानुमानापेक्षा, अवस्तुत्वादेव । भावधर्मे तु साधने वस्त्वेवाश्रयो
41a/jnams वस्तुधर्मत्वात् । वस्तुनश्च निश्चयः प्रत्यक्षानुमानाभ्यामेव, ततस्तयोरभावे नियमेनाश्रयासिद्धिरिति सदसत्तासाधनयोः कथं समानो दोषः ? § 361

यत्तु त्रिलोचनेन प्रमाणान्तरं नित्यानामसत्तासिद्धौ क्रमादिविरह-स्याभावधर्मता न सिध्यतीत्युक्तम्, तद् बालस्यापि दुरभिधानम् । नित्या हि
101 धर्मिणः । असत्त्वं साध्यम् । क्रमादिविरहो हेतुः । अस्य चाभावधर्मत्वं नाम स्वसाध्याबिनाभावित्वमुच्यते, अभावानां शशशृङ्गादीनां धर्मो न भावानामिति कृत्वा । तदनेन वचसा यावत् प्रमाणान्तरेण पक्षे साध्यं न सिध्यति, न

७ तः] तत् र
९ र्म] धर्मा र
११ न्ति] सन्ति र
११ र्मी] धर्मा र
१३ ता] कुर्वतु र
१३ च] कुर्वतैव र
१४ रितोऽर्थः] अर्थ र
१६ र्मो] यावानवस्तु० र
१७ यात्] ०दन्यविप० र
१७ सिद्धे] ०भ्यां सि० र
१९ सिद्ध] मात्रासिद्ध र
२१ र्मे] देवाभाव० र
२३ भावे] नियमो ना र
२४ नेन] प्रमाणान्तरान्नि० र
२५ ता] इत्रयादि० र
२७ ते] साध्यसिद्धत्वमुपयुज्यते इति योजितं केनचित् अ
२८ ति] सिध्यतीति अ

तत्प्राक् कारणसन्निधेः फलमसन्नाशस्तनोति स्थितिं तावन्तं
किल कालमित्यपि मृषा नाशः स्वरूपादृशः ॥§ 378

नहीदन्तया नाशस्य स्वरूपमुपलब्धिगोचरं येनान्वयव्यतिरेकनिश्चयात् कारणाभिमतमुद्गरादिसन्निधेः प्राक् नाशाख्यं कार्यमभवत् तावन्तं कालं भावस्य स्थैर्यमापादयेत्, यावता नाशस्य स्वभावानुपलब्धेर्मृषैव कल्पनेयमिति कुतः कारणानुपलब्ध्या स्थैर्यसिद्धिः ? § 379

ननु घटमुद्गरादयो दृश्यन्ते तावत् तेष्वेव कश्चिन्नाशो नामेति नाशस्वरूपानुपलब्धिरसिद्धेति चेत् ? § 380

दृष्टस्यावदयं घटोऽत्र च पतन् दृष्टस्तथा मुद्गरो दृष्टा
कर्परसंहतिः परमतोऽभावो न दृष्टोऽपरः ।
43b/jnams तेनाभाव इतिश्रुतिः क्व निहिता किं वात्र तत्कारणं स्वाधीना
परिधस्य केवलमियं दृष्टा कपालावलिः ॥§ 382

सुनिपुणं निरूपयन्तोऽपि मांसचक्षुषा वयं तावन्नापरमत्र वस्तुजातमीक्षामहे, यदभावश्रुत्या विषयीक्रियते । तद्दर्शनाभावाच्च तत्कारणमपि किमवधारयामो, यदभावेन पूर्वपूर्वमसन्नाश इति स्यात् ? यश्च तत्कारणं कल्पितो दण्डस्तस्याप्यन्वयव्यतिरेकानुविधायिनी कपालपंक्तिरेव दृष्टा, नान्या काचित् । वैधर्म्यदृष्टान्ततयेयमुपन्यस्ता पुनः, यथेयमध्यक्षानुपल-
108 म्भाभ्यामन्वयव्यतिरेकावनुविदधती दृश्यतया दण्डस्य कार्यमवस्थाप्यते, तथा यदि नाशाख्यमपि वस्तु दृश्यं स्यादनात्मरूपविवेकेन तस्यापि तरस्विदण्डकार्यता अवार्यैव, न चैवम् । तस्मात् कल्पनैवेयम् । § 383

स्यादेतत्,

आस्तां कर्परपंक्तिरेव कलसध्वंसो न चेयं पुरा
तेन स्थैर्यमपि प्रसिध्यतु ततो भिन्नेन नाशेन किम् ।§ 386

अत्रोत्तरम्, § 387

नाशः सैव यथोच्यते यदि तथाभावोऽपि कुम्भान्तर-
न्यासेऽभावरवः कथं मतमतः सिध्यत्यभावेऽपि नः ॥§ 389

---

१ किल] किलेति नास्ति आ
२ रं] ०गोचरो अ
८ रो] मुरो आ
८ तिः] दृष्टो अ
८ न] दृष्टः परः अ
९ स्य] पलिधस्य अ
९ लिः] तत्त्वचिन्तामणिप्रत्यक्षखण्डे ७१७ पृ., रत्न० निब० १११ पृ.
१२ भावेन] नेति नास्ति अ
१२ न्नाश] पर्वमसन्नास अ
१५ ती] ०कावथ० अ
१७ अवार्यैव] ०वार्यता आ
१७ म्] ०दकल्पनै० आ
२० तु] प्रसिध्यति आ
२२ थाभावोऽपि] अभावेऽपि अ
२३ नः] रत्न० निब० पृ: ११२

व्यतिरेकावधारितार्थस्यापलापः प्रसक्तः । यदा पुनरनर्थित्वादिना घटामर्शेन शून्यता पुरुषस्य, तदा कपालावलोकनात् कपालकल्पनैव जायते, सामग्रीभेदस्य भेदकत्वात् । यदि पुनर्भवदभिप्रयानुवर्तिनो भावा भवेयुर्न भवेदप्येवम्, तथापि यदीच्छसि कपालानुभवादेव नष्टघटबुद्धिरस्त्विति, तदा तथैव स्यादिति न नाशः प्रयोजकः । तदलं स्वमनीषिकासंप्रत्ययेन कर्परदर्शनमेव तद्बुद्धिनिबन्धनम् । यदा तु कलसविमर्शमपेक्षते तथा सङ्केतस्मरणमपि, ततो नातिप्रसङ्गः । न च सङ्केतोऽपि नाशमुपदर्श्य कर्तुं शक्यः, तस्यादृश्यत्वादेव, किं तु विसभागोत्पत्तिरूपं विकारमुपदर्श्य एतादृशावस्थायां नश्यतः प्रयोग इति । § 409

एतेनाभावदर्शनमेव भावानुपलम्भं संभावयन्तो निरस्ताः, अभावरूपादर्शनादेव । तस्मान्न ध्वंसो नाम कश्चित् पश्चाद्भावी । § 410

किं चान्यप्रकृति प्रतिक्षणमिदं संसाधितं चेज्जगत् । 45b/jnams
प्रौढन्यायबलाद् विलम्बि निधनं स्याद् वा नवा किं ततः
॥§ 412

स्यादेतत् । § 413

न ध्वंसेन विनान्यतैव हि भवेद् भावेन सार्धं स चेत् ।
सच्चासच्च किमस्तु वस्तुनियतं भावानुजोऽसौ ततः ॥
भावात्तेन विभिन्नकारणतया तत्कारणासंभवेभावात्तेन 113
कृतान्यतापि गलिता भङ्गः कुतोऽनुक्षणम् ॥§ 415

भावहेतोः सकाशादभावोदयवर्णना भावेन सार्धं स चेदित्युक्तम् । अत्र ध्वंसादन्यतेति कोऽर्थः ? किमेको भावस्तेन खण्डखण्डीक्रियते ? अथ भावान्तरोत्पादनमात्रमस्मात् ? उत प्राचीननिवर्तनं च भावान्तरोत्पादनं च ? यद्वा प्राचीननिवर्तनमात्रम् ? तत्र,

नैकात्मानमनेकतां गमयति ध्वंसो विरोधात्तयोरेकानेकतयोः ।
ननु कालभेदेनैकमप्यनेकं भवन्न दुष्यतीति चेत् ?
स्वभेदविरहे कालस्य भेदेऽपि किम् ।§ 418

यदि हि कालभेदको भावभेदको (Edtext outside numbered paragraph) भवेद्, भवेदेतत् । भावस्य तु तादवस्थ्ये काश-

१ र्शेन ] ०मर्शन० अ
३ र्तिनो ] ०वृत्तिनो आ
५ येन ] स्वननीसिकासं० आ
६ दा ] यथा अ
७ त्वादेव ] दृश्यतादेव अ, दृश्यवोदेव आ
८ तु ] विलय? अ
१३ तः ] निस्याद्वा न किंचित् आ
१५ तैव ] ०न्यत्रै० आ
१५ स्तु ] ०मस्ति आ
१६ भावात्तेन ] भावातेन आ
१६ भावात्तेन ] तावत्तेन आ
१७ ना ] भावहेशादभावोपय० आ
२१ योः ] एकात्मयोः अ

नाश इति निवृत्तिः ध्वंसाख्यो वा, ध्वंसोऽपि मुद्गरादिरेवास्तु । अलं पृथक् 46a/jnams ध्वंसकल्पनया, तावतापि तदभावात् पुरा स्थिरो भाव इति सिद्धेः । § 429

अत्रोच्यते, § 430

तद् द्वयं
भावत्वेन न भावरोधि, § 432

न हि भाव एव भावस्य विरोधी भवितुमर्हति । अविरुद्धभावे च कथमन्यस्य निवृत्तिरदर्शनं वा ? अत्रोत्तरं, § 433

भवतो भाषैव भावान्यता । § 434

नात्र भावानां सामर्थ्यम्, किं तु भवत एव भारत्या भावता अभावता वा । तथा हि भवतीति भावः, भवनं चोत्पत्तिस्तावदस्य स्वीकृता । यदाप्यस्तीति भावः, तदापि विद्यमानता भावार्थः । सापि स्वरूपसत्त्वलक्षणा स्वीकृतैव नित्यतालंकृता यावत् । यच्चास्तीति न भवति तत् किमुत्पद्यतिना संबध्यते बन्ध्यासुतवदङ्कुरवच्च ? § 435

115

अथ सर्वसामर्थ्योपाख्याविरहेणाभावव्यवहारात् शक्तिरपि सत्त्वमनुमन्यते, सापि स्वज्ञानजननेऽभ्युपगतैव, निःशङ्कगमनादिकं च तत्कार्यमेव । स्वाभ्युपगतः सत्त्वसमवायः स्वकारणसमवायो वा परं नास्ति । न च सर्वेण भावधर्मेण सर्वत्र भावे भवितव्यम्, नापि सर्वभावधर्माभावेन भावान्तरस्यापि न भावत्वम् । एवं सति सामान्यविशेषसमवायानामप्यभावप्रसङ्गः । *तेभ्योऽप्यधिको ध्वंसस्योत्पत्तिरेवापराधः । वस्तु चावश्यं नाशो वसत्यर्थक्रिया अस्मिन्निति न भाव इति कष्टो वतायं सिद्धान्तविषमग्रहः । तस्माद् भवतोऽत्र स्वातन्त्र्यम् । यदि भणसि ध्वंसोऽपि भावः स्यात्, मुद्गरादिरपि कुम्भस्याभावः स्यात् । § 436

न खलु मुद्गरादिकं भावमभावं वा कश्चिद् व्यवहरतीति चेत् ? ननु ध्वंसमपि यदि केनचिद् रूपेण जायमानमुपलभेत कश्चिद् विशेषतो नित्यस्थितं किमभावं व्यवहरेत् ? दृश्यन्ते हि तनुधूमादयो व्यवधानानवधानादिना अनुपलब्धमूर्तयः पुनरुपलभ्यमाना भावव्यवहारभाजः । तस्माद् भावव्यवहारहानिरस्यादर्शनादेव प्रत्यात्मं वेद्यते प्रतियोगिदर्शनस्वभावात् । तच्चादर्शन-

१ वा] ०ख्यम्वा आ
६ हि] भावरोधिना हि आ[[Reference of note not clear from print.]]
८ भाषैव] भाषैव आ
१० वा] ०ऽभावाभावात् र
१२ तालंकृता] कृतया० अ
१६ वा] वेति नास्ति आ
१७ र्माभावेन] सर्वधर्मा० र
१९ *] ०ह्यधि० आ
२३ लु] ननु न अ
२३ वा] वेति नास्ति आ
२४ भेत] ०लभ्यते अ
२५ धानादिना] ०धादिना आ
२६ भाजः] ०मानाव्यवहार० अ
२७ भावात्] स्वेति नास्ति आ

वस्थानमभिमतो विरोधः, तदा सिध्यतु भावस्य सत्तोपलम्भयोर्निवृत्तिः ।
केवलं भावयोरेवासौ न भावाभावयोः । § 446

ननु तस्मिन् सति तन्निवृत्तिरितीयता सहानवस्थानमभिमतो विरोधः,
तच्चाभावेनापि भावस्य लभ्यत इति न भावयोरेवेति युक्तो नियम इति चेत्
? उक्तमत्रास्मिन् सतीत्येव दुर्लभमभावे इति । किं चैवमभावत्वसमर्थन-
मनुपयोगि, भावयोरपि तद्विरोधस्याविरोधात् । मुद्गरादिनैव विरोधसिद्धेश्च
ध्वंसस्यानुपयोगात् । अथ लाक्षणिको विरोध इष्टः, तदा स्वरूपासंकरेणैव
तस्य कृतार्थत्वाद् भावस्यावस्थानमनिवार्यम् । § 447

किं च, सहानवस्थानलक्षणपक्षे नानुत्पन्नेन विरोधिना परो विरोद्धव्यः,
शीतहुताशवत् । प्रथममुत्पत्तिः, ततो व्यापारः, व्यापारपाटवतारतम्यापेक्षया
118 कियतापि क्षणेन परोपरोध इतीयन्तं कालमुपरोधात् प्रागभावेन सह
संवसेत् । अथोत्पत्तिक्षण एव व्यापारस्तथाप्युत्पद्यमानेन ध्वंसेन सह-
कारिणा भावः स्वोपादेयं बन्धमादधीत, ततो निवृत्तिरिति दुर्निवारः सहभावः
। बन्धक्षणाधानानपेक्षायामपि स्वसन्तानक्षणानन्तरं नाशनात् क्षणमपि सह-
भावः सिद्धः । एतच्च कथं चेतनावतः सोढुं शक्यमेकस्मिन्नेव क्षणे भावस्य
भावाभावाविति ? § 448

अपि च सहानवस्थानस्वीकारात् कृशानुना शीतमिव ध्वंसमपरमुत्पाद-
यता ध्वंसेनापि निपादि निवर्तनीयमिति, तेनापि ध्वंसमपरमुत्पादयता प्र-
तियोगी प्रतिहन्तव्य इत्यनवस्थानात् पुरुषायुषशतेनापि न कस्यचिदभावव्य-
47b/jnams वहारः स्यात् । अथ द्वितीयो विरोधः, तदा यत्र भावस्तत्राभावस्यावकाश
एव नास्ति । अयमेव हि लाक्षणिकविरोधस्य स्वभावो यद्विरुद्धयोर्धर्मयोर-
न्यतराधिष्ठिते धर्मिणि नेतरस्यावकाश इति अनुत्पत्तिरेव ध्वंसस्य । अथ
हेतुसामर्थ्यात् कथमभूत्वा आसितुं शक्नोतीत्यवश्यं भाव्यं ध्वंसेनेति चेत्—
न, प्रमाणबाधितेऽर्थे हेतुसामर्थ्यकल्पनानुपपत्तेरतिप्रसङ्गात् । यावत् खलु
भावस्य श्वासः चलति न तावदभावगन्धः । अन्यथा विरुद्धाभिमतयोः ध-
र्मयोरेकत्र धर्मिणि क्षणमपि संभवे क्व परस्परपरिहारविरोधः ? तथा हि
हेतुबलाद्भवतु नाम, सहभावस्तु वस्तुन्येकत्र भावाभावयोर्दुष्परिहरः । स हि
भावः पूर्वव्यवस्थितो, न भवनप्रयासखिन्नो यन्निवर्तेत । मुद्गरादेश्च ध्वंस एव
व्यापारः । उभयत्र व्यापारेऽपि किमङ्ग ध्वंसेन ? नापि ध्वंसेनैव निवर्त-

२ योरेवासौ ] रेवाभासौ अ
३ विरोधः ] अभि...रोधः इति नास्ति अ
६ रादिनैव ] ०दिनेवविरोधि० आ
७ रेणैव ] शंकरेणैव अ, आ
११ रोध ] परो० नास्ति आ
११ भावेन ] प्राक् । अभावेन आ
१३ धीत ] सम्बध्य आ
१३ दुर्निवारः ] दुर्वारः आ
१४ रं ] स्वेति नास्ति अ
१७ च ] सहनव आ
१८ ध्वंसेनापि ] निपाति अ
१९ स्थानात् ] पुरुषापुरुष० आ
२० काश ] ०स्तत्राभाव इति नास्ति आ
२६ हि ] तथापि अ
२८ र्तेत ] निवर्तते अ
२९ ध्वंसेन ] पंसोन र

नीयः, तस्योदयात् पूर्वमव्यापारात् । ततो भावस्य स्थितिरभावस्योत्पत्तिरिति सिद्धः सहभावः, गिरेरिव केशरिणोत्पद्यमानेन । § 449

पश्चात्तर्हि वर्हिषेवेन्धनध्वंसेन निराकरिष्यते तावदिति चेत् ? भावाभावयोः सहभावप्रसङ्गदूषणादविभ्यदभ्यस्तदुर्नीतिरुत्तरं किल विलपति । पश्चाद् विध्वंसेन भावो निराकरिष्यते न वा, भावाभावयोस्तु सहभावः प्रसक्त इत्येव पक्षक्षतिरायाता । किमपरगवेषणेन ? यदि च व्यवस्थितो भावस्तेन ध्वंसेन ध्वंसनीयः, तदा व्यक्तमयं सहानवस्थानविरोधव्यापार इति प्रकृतक्षतिः । परस्परपरिहारविरोधो हि विचारयितुमुपक्रान्तः । ततः प्रकरणविस्मरणाद् व्युत्थापयत्यद्यापि परस्परपरिहार विरोधाभिमतः, तदा 119
न व्यवस्थितापनयनव्यापारः स्प्रष्टव्य इति द्राधीयानसहभावः । संप्रति स्वहेतुबलावलम्बिनोः कलसनाशयोरुपनतौ भावाभावौ चैकत्र धर्मिणि धीयेते चिरमिति पर्यवसितं विरोधकथया । § 450

अथ ध्वंसेन स्वोदयात् प्रागेव भावो निर्बध्यमानो निवर्तते प्रवर्तते चानन्तरं ध्वंस इति नोक्तदोषः । न चैष व्यापारः सहानबस्थानस्येति चेत् ? न शक्यमेवम् । व्यवस्थिते हि वस्तुनि, § 451

पश्चात्प्रवर्तमानोऽपि ध्वंसात्मा तस्य किङ्करः ।
अप्रवृत्ते यतस्त्वस्मिन् वस्त्वेव बलवत्तरम् ॥§ 453

व्यापारस्तु यथा नैष सहानवस्थानस्य तथा परस्परपरिहारस्यापीति निवेदितमेतत् । नापि भविष्यतः काचिच्छक्तिः । स्वयमेव तर्हि निवर्तताम् ? एवं सति किमत्रान्येन ध्वंसेन मुद्गरेण वा ? तत्सन्निधानापेक्षायां च स्वयंशब्दार्थो रिक्तः । यथा बीजमपेक्ष्य स्वयमेव जायतेऽङ्कुर इति न तावता तत्प्रयुक्तत्वपरिहारः । *अथ परिहार एव, तदा तदपेक्ष्येति न वक्तव्यम् । तावता च सिद्धं साध्यमित्यनेन किमिह कर्तव्यम् ? ध्वंसमुद्गरादिकमन- 48a/jnams
पेक्ष्य स्वयमेव भावो नित्रतत इति प्रागपि निवृत्तिसिद्धिः । वस्तुमात्रानुबन्धी च ध्वंसो निबन्धनान्तरनिरपेक्ष इति,

सहस्थानाभावो यदि तव विरोधोऽर्थविपदोः सहस्थानासङ्गं
क्षणमपि यथा शीतशिखिनोः ।

१ त्तिरिति ] भावस्य वोत्प० आ
२ भावः ] सहभावः इति नास्ति अ
३ ध्वंसेन ] ०ष्वेबन्धन आ
३ दिति ] करिष्यतो भाव इति आ
६ णेन ] ०रः वेषणेन आ
६ स्थितो ] स्थितो अ
९ द्यापि ] युक्तोपपद्यद्यापि अ
९ तः ] परिहार एवाभि० आ
११ म्बिनोः ] कलसयोरु० आ
१४ रं ] चान्तरं आ
१७ वृत्ते ] पाठोऽस्पष्टः अ
१९ तः ] क्वचि० आ
२२ ता ] स्वप्रयु० अ
२२ * ] अथ परिहार इति नास्ति आ
२२ पेक्ष्येति ] ०पेक्षेति अ
२४ पेक्ष्य ] ०मपेक्ष्य र
२६ व ] यदतर आ
२६ व ] ०ऽन्ववि० अ[[Reference of note not clear from print.]]
२६ ङ्गं ] सङ्ग० आ
२६ शिखिनोः ] शं...साधिनोः ? अ

सहध्वंसो ध्वंसान्तरमुपनयन् संप्रति भवेद् विरोधी सोऽप्यन्यं
क्षयमिति न नाशः कथमपि ॥§ 456

अथान्योन्याभावप्रकृतिकतयाऽर्थे सति तदा क्षयस्यैवाभावः
सह भवतु वा हेतुबलतः ।
अनेन ध्वंसेन प्रकृतिहतिरस्य त्वनुदये बलीयानेवार्थः
स्वयमपचयेऽन्येन किमिह ॥§ 458

इति संग्रहश्लोकौ ॥ § 459

120

एतेन यत् शङ्करस्याभवनोत्पत्तिविधानेन कथं भावस्य निषेध इति चेत् ? अभवनोत्पत्तेरेव सह स्थितिविरोधेन भावप्रतिषेधरूपत्वादित्येवं प्रकारमभिधानम्, तद्विरोधबोधवैधुर्यादियुक्तमिति दर्शितम् । अत एवाभावोत्पत्तिविधानेन च भावस्य तादवस्थ्यप्रसङ्ग इति प्रमत्तभाषितमित्यभिदधानः स्फुटमयं तपस्वी प्रतिवातक्षिप्तभस्मनात्मानमेव च्छुरयतीति महामोहमग्नतया कृपापात्रं महतामवगन्तव्यः । यद्येवं भवतामप्यभावो व्यवह्रियते स किंस्वभावो यदि न वस्तु भावेन वा सत्यं न विरुध्यत एवायम् ? कथं वा विरोधद्वयव्यवस्था ? को वास्य हेतुः ? कादाचित्कत्वे अकादाचित्कत्वे च भावस्य समकालं कथं न व्यवह्रियते ? कथं वा प्रागिव पश्चादपि न क्षणपरम्पराप्रसवः ? प्रसवे च न सहः सहानवस्थानविरोधः । § 460

परस्परपरिहारोऽपि भावाभावयोरभावस्यावस्तुत्वेनावास्तवः प्राप्त इति चेत् ? यत एवं परमतं विचारक्षमम्, § 461

तस्मात्प्रच्युतिमात्रकं व्यवहृतेः पात्रं प्रसज्याह्वयं भूयोऽर्थस्य
विरुध्यते न तु जनिस्तस्येति किं हेतुना ।
रोधादेव सकृन्न तद्व्यवहृतिर्हेतुक्षयान्नोदयो रोधस्तात्त्विक एव
तात्त्विकमिथः स्वाभाव्यभङ्गस्थितेः ॥§ 463

भावप्रच्युतिमात्रं प्रसज्यप्रतिषेधसंज्ञकमिति स्वरूपनिर्देशः । तत्र प्रतिषेधे प्रतिषेधमेव वस्त्विच्छन्तीति प्रच्युतिमात्रमुक्तम् । प्रच्युतिर्नाम किंस्वित् तृतीयो भावनिषेध इति शङ्कायां प्रसज्याह्वयमित्युक्तम्, तच्च तथा व्यवहारमात्रविषयो न पुनरनुभवविषयः अन्यथा वस्त्वेव स्यात् । § 464

---

२ तः ] नाहेतुवतः र
३ ये ] ०त्वमुदये अ
३ किमिह ] किमिति आ
५ त् ] ०स्याद्यभ० अ
७ मिति ] वैधुर्यादिति अ
८ च ] चकारो नास्ति आ
९ यं ] स्फुटन्ननु० आ
११ न ] न चा० र
१४ वः ] परम्परप० आ
१५ रिहारोऽपि ] अपीति नास्ति अ
१५ वः ] ०स्यारम्भत्वे? अ
१६ तं ] विचारा० आ
१७ तु ] जनैः आ
१८ मिथः ] तात्त्विकमेन आ
१८ स्थितेः ] क्षितेः र
१९ त्र ] प्रसज्यप्रति० र

50b/jnams अथानुपलम्भमात्रस्य स्वसाध्यसाधनसामर्थ्यशून्यतैवापराधः, विकल्पमात्रस्य पुनरसामर्थ्यवैयर्थ्योल्लेखशेखरस्य न हेतुवादापवादशक्तिशून्यतेति विषम उपन्यासः । अहो पुरुषकारो भस्मभूषणस्य ! एवं हि सर्वथा हेतुफलापलापे साधु साधितं ध्वंसस्य हेतुमत्त्वमिति व्यक्तमयमात्मानमात्मनैव विडम्बयति । तदयं भवनस्वभावादिविकल्पः संकल्पनिवेशितशक्तिरपि विषये च परिहार्यः कार्यकारणभावव्यवस्थितेन, अन्यथा मूलोच्छेदात् प्रकरणप्रवृत्तेः । सिद्धोपाधिस्तु विकल्पो विनाशकरणमेव कवलयति, न कारणमात्रम् । अतिप्रसङ्गभङ्गभीरुणा तु भवता नाद्रियते इति युक्तमेवैतत् । तस्मात्

हन्तु हेतुफले श्रमोऽयमफलः संस्थाप्य सामान्यत-
स्तत्त्वं क्वापि विमर्श एवविषये प्रारम्भसंभावितः ॥ § 485

प्रारम्भ उपक्रमः प्रस्तावः तेन संभावित आदृतः । सामान्येन कार्यकारणभावसत्तां व्यवस्थाप्य विनाशादौ विषयविशेषे क्वचिद्धेतुसत्ता किमस्तु नवेत्यत्र विमर्श एषोऽस्मदीयः प्रस्तावानुरूपः । हेतुफलोन्मूलनाय तु विफलः प्रयासः, सामान्येन व्यवस्थाप्यैव प्रकरणप्रवृत्तेः । न चायं विकल्पः कार्यकारणभावक्षेपाय क्षमः भवनस्वभावोऽभवनस्वभावो वा हेतुतो भवतीति । तथा हि अभवनधर्मा तावद् बन्ध्या प्रसूतीति भवनस्वभावश्च, त्वन्मतेन गगनादेरभवनस्य कदाचिदप्यभावात्, तयोस्तावदसामर्थ्यवैयर्थ्यग्रस्तो भवति हेतुव्यापारः । कादाचित्कं भावं भवनधर्माणमभवनधर्मकं वा ब्रूहि, न पुनरयं किञ्चिदनपेक्षमाणः कादाचित्क एव भवितुमर्हति, यश्चापेक्षोऽर्थः कालदेशस्वभावनियमाय स एव हेतुः । अथ भवनस्वभाव इति न सत्ताधर्मा किं तु उत्पत्तिधर्मेति विवक्षितम्, तदाप्युत्पत्तिरित्यसत आत्मलाभो न कादाचित्कत्वादन्य इति तद्वदेवोत्तरम् । विनाशस्य तु कादाचित्कत्वनिषेध उक्तः । § 486

अथ हेतुतो भवनधर्मा यः स किं भवतीतरो वेति विकल्पार्थः ? तदा आद्यविकल्प एव विश्रान्तो वादः । तथा हि हेतुतो भवति, न

१ राधः ] सामर्थ्यं आ
२ स्य ] पुनसामर्थ्य० आ
४ साधु ] साधु इति नास्ति आ
५ ल्पः ] ०संकल्प इति नास्ति आ
६ च ] ०यमिव आ
६ रिहार्यः ] कार्येति नास्ति आ
६ मूलोच्छेदात् ] पूर्णोच्छेदात् आ
७ ति ] कलयति आ
८ तु ] तु इति नास्ति आ
८ ते ] नाद्रियत आ
८ इति ] इतोति नास्ति आ
१० न्तु ] हर्तुं आ
११ र्श ] विमर्ष आ
१२ स्तावः ] प्रस्ताव इति नास्ति अ
१४ र्श ] विमर्ष अ
१६ तीति ] भवेद् आ
१७ तेन ] त्वन्मते अ
१८ स्य ] ०रभवनस्या० आ
१९ ति ] भवतु अ
१९ कादाचित्कं ] ०त्के तु अ
१९ कं ] भवन धर्मानन्यभ० आ
२० न ] नेति नास्ति आ
२० माणः ] ०पेक्षणः आ
२३ न ] ०त्वोदस्य आ त्वादिष्ट र

जन्मना तदभावेन तत्स्वरूपविरहलक्षणेन स्वलक्षणशालिनार्थानुरूपव्यवहारं प्रवर्तयता निरस्तसमस्तार्थक्रिया किं नश्छिन्नमिति, तदपहस्तितम्, समस्तार्थक्रियानिरसनस्यैव तदवस्थे तस्मिन्नशक्यसाधनत्वात् । § 492

तदभावेनैव तादवस्थ्यखण्डनमिति चेत् ? ननु भावे तावत् तदवस्थ एव स्वकारणप्रभावादभावो जातस्ततो व्यावृत्त्य तत्खण्डनमनेन कर्तव्यमिति समसमयताप्रसङ्गः प्राचीनो दुष्परिहरः । तथा च सति तत्स्वरूपविरहलक्षणेनेत्यनुपपन्नम्, न हि तद्विरहरूपत्वे तत्कालसंभवो नाम । ततो मुद्गरादिपदार्थान्तरसाधारणस्य अभावसंज्ञाकरणे नाभिमतस्वलक्षणशालिताभिव्यक्तिसिद्धिः, यतः तदनुरूपव्यवहारप्रवर्तनमभिधीयमानं शोभेत । तेन च स्वरूपस्यार्थक्रियायां तादवस्थ्यस्य चाखण्डनमिति परस्पराकर्षी नाशान्तरकरणप्रसङ्गः । § 493

स्वयंनिवृत्तिरूपतया न नाशान्तरावकाश इति चेत्—न, समानकालसंभवात् निवृत्तिरूपतायाः प्रतिक्षिप्तत्वात्, पदार्थान्तरवत् पर्युदस्तमेव रूपमवशिष्यते । तेन च विनाशेन नियतं परभूतविनाशाख्यवस्तुकरणं मुद्गरेणेव, को हि विशेषोऽस्य तत्पर्युदस्तरूपत्वेन मुद्गरात्, यदयं परमनपेक्षमाण एव नाशयति ? मुद्गरस्त्वेनमनपेक्षमाणो नाश इति स्यात् । विनाशसंज्ञाकरणप्रतिलम्भस्तु भवेत् । तामन्तरेण तस्यापि मुद्गरादविशेषात्, आकारभेदमात्रस्य मणिमन्त्रादिष्वपि भावात् । § 494

यदि तु प्रत्यक्षानुपलम्भं शक्तिसाधनमेकनियतं भवेद्, भवेद् विशेषः । तच्च नास्तीति प्रतिपादितम् ॥ § 495

तस्मात्,

> प्रसज्यपक्षेऽस्ति न तुल्यकालता न पर्युदासे परनाशवर्जनम् ।
> 129 स्थितेऽन्यदन्यत्रभवद् भवेत् सकृन्नियोगतोऽन्यक्षणतानुरोधिनि ॥§ 498

इति संग्रहः ।

> स्थितेऽपि हेतौ भवदेकदा न चेत् प्रयोजनं तत्क्षणभङ्गसंभवात् ।

---

१ भावेन] ०रूपपरिवहनक्ष ? अ
१ णेन] ०नाशिना र
४ त्] ननु तावता र
५ नेन] ०स्ततो...खण्डनन० इति त्यक्तम् र
६ ति] ततोऽनुरूपादि र
८ तो] ०पदार्था...संज्ञा० इति त्यक्तम् र
९ तः] ०हारः र
१४ विनाशेन] विनाशने आ
१४ तं] नियतस्यर० ?
१५ एव] ०मपेक्षमाणमेव आ
१६ नाश] ०मपेक्षमाण आ
१७ स्तु] विनाशकारणप्रति० अ
१९ तु] यदि प्रत्याख्या आ
१९ विशेषः] विकल्पाशेषः र
२२ ता] तुलका० अ
२३ तानुरोधिनि] ०ल्पलक्षणतानु० आ, ०न्यक्षणतस्तु अ

मेवैतत् । *तथाप्युच्यते, भेदाभेदनिर्देशयोरेक एवार्थस्तत्त्वतः केवलं यदि भिन्नवस्तुसिद्धिः प्रमाणबलावलम्बिनी, तदाद्य नास्तीत्यस्यापि वाक्यस्याद्याभावोऽस्तीत्ययमेवार्थः । § 525

अथ भिन्नवस्तुबाधैव प्रमाणान्वयिनी, तदाभावोऽस्तीति तावदस्तु । अद्याभावो जात इत्यस्यापि वाक्यस्याद्य नास्तीत्येवार्थो वेदितव्यः । प्रमाणान्वेषणे च दृश्यतया स्वीकृतस्यादर्शनमेव बाधकमुक्तं च साधकं च किञ्चिन्नेत्यपि । अद्यानुपलम्भेऽपि तत्कालवर्तिनः कालान्तरे वस्त्वन्तर- 136 रूपमस्पृशता विरहमात्रेण सिद्धत्वमित्युपपादितम् । न च विरहमात्रेणेति करणशक्तिनिर्देशाद् वस्तुत्वप्रत्याशा, विवक्षापरतन्त्रत्वात् क्रियाकारकव्यवहारस्य,

याति गन्धर्वनगरादेष बन्ध्यासुतः पदा ।
मृगतृष्णाम्भसि स्नात्वा पित्रे दातुं जलाञ्जलिम् ॥ § 528

इति । सकलकारकशक्तियोगेऽपि वस्तुत्वाभावात् सर्वथा मिथ्येदमिति चेत् ? विवक्षापरतन्त्रतामात्रेण दृष्टान्तीकृतत्वात् । § 529

क एवं साधुरभिदधीतेति चेत् ? न कोऽप्यभिधत्तां प्रकृतसिद्धेरविरोधात् । न च साधोरप्येतत्पाठोऽसंभवी सर्वथा किं तत् साधुर्नाभिदधीतेति तदश्रुतवतः प्रश्ने तत्पाठमात्रेण साधुताक्षतेरभावात् । *कूर्मरोम्णां तु मिथ्यात्वं स्वीकृतमित्यपि किमसाधुनैव वक्तव्यम् ? नापि सर्वथा मिथ्यैवेदम् । तथा मान्धाता नास्तीति नाद्य स्थीयते मान्धात्रेति वा व्यक्ता कर्तृशक्तिर्न वस्तुतां प्रत्युज्जीवयति । § 530

निषेध एव तस्या वर्तत इति चेत् ? अत एव विवक्षापारतन्त्र्यमपेतसन्देहम् । तस्मात् कारकशक्तिनिर्देशेन वस्तुतासिद्धिप्रत्याशा फेनसंघातेन तोयतरणमनोरथमनुहरति । § 531

तदेवं नाभिधानाधीनमर्थतत्त्ववशेनेदं त्वभिधानमिति भेदनिर्देश एवाद्य अभावोऽस्य जात इति भिन्नवस्तूत्पत्तिमिवासंशन् अद्येदं नास्तीत्यस्य प्रसज्यप्रतिषेधमात्रसूचकस्यार्थे स्थाप्यो, न विपर्यये, प्रमाणाशरणत्वादस्य विभागस्य । तत्कालनियमेन कालान्तरेऽभावाभिधानं च सिद्धसाधनम्, वस्त्वन्तरोत्पत्तिरेव हि निषिध्यते कालान्तरे, न च प्रसज्यप्रतिषेधव्य- 54b/jnams वहारमात्रं प्रतिषिध्यते । तदस्य बाधविधानप्रतिपादनेऽपि न परमार्थसत् पदार्थान्तरसिद्धिः । § 532

---

१ *] तत्काप्यु० अ
८ ता] ०रूपस्पृशता आ
११ दा] सुतो य० अ
१७ *] ०रोन्तुमि० अ, रोम्नामि० र
२२ स्मात्] कारण० आ
२३ संघातेन] ०पदवतरण० आ
२४ निर्देश] एवार्था० आ
२५ न्] ०त्पत्तिनिरा० र
२६ स्यार्थे] ०स्यार्थो अ
२६ न] विपर्ययः अ
२८ रे] ०कान्तरे आ, कालान्तर अ
२८ च] न तु आ
२९ स्य] बाधा० आ

नापि ध्वंसात् परिघवदतो भिन्ननाशप्रसक्तेः कस्मान्नैष स्फुरति 140
चटकालोपवृत्तं किमेतत् ॥[§ 557]

इत्यन्तरश्लोकः । क्षणिकत्वे तु,

स्वकारणादेव यथान्यरूपविच्छिन्नरूपः समुदेति भावः ।
विच्छिन्नभिन्नक्षणवृत्तिरेवं स्वकारणादेव न जायते किम् ॥[§ 559]

इत्युक्तम् ।

अभावतोऽर्थान्तररूपबाधे
तत्राप्यभावान्तरमीक्षणीयम् ।[§ 561]

तत्र यदयमाह, प्रदीपप्रकाशवन्नानवस्थेत्येके इति । तत्रोच्यते, [§ 562]

प्रदीपदृष्टान्तमतं न कान्तं
स्वरूपसन्दर्शनविप्रयोगात् ॥[§ 564]

दृष्टो हि प्रदीपः परप्रकाशनशक्तियुक्तः कथमपह्नोतुं शक्यः ? अभावस्य पुनः स्वरूपवेदनं स्वप्नेऽपि दुर्लभम् । तत्र क एवं धृष्ट आकाशचित्रमाचरतु एतद्भावेऽयमस्य भेदः, तदभावे चात्र नास्ति, स्वयं चानेन रूपेण भिद्यमानो नान्यमपेक्षत इति ? तत् कथं प्रदीपेन साम्यम् ? किं च, [§ 565]

प्रदीपवच्चेदयमप्यभावो भिनत्ति भावं च विभिद्यते च ।
स एव भावोऽप्युदितः स्वहेतोर्भिनत्तु भावं च विभिद्यतां च ॥[§ 567]

न ह्येवमभिधीयमानं वदनं वक्रयति । अदर्शनादन्यपौरुषाभावस्य । न च दृष्टान्तमात्रात् साध्यसिद्धिः, हेतुस्तद्भावसाधनायाभावे उपादीयमानः कोऽसावस्ति यो नाश्रयासिद्ध इति ? [§ 568]
141

यत् पुनराह, वयं तु पश्यामः । तत्रानवस्था नाभ्युपगम्यते यत्रानवस्थायां किञ्चिद् दृष्टं विरुध्येत, न चात्र दृष्टं किञ्चिद् विरुध्यते । या तावद् घटस्य पटादिभ्यो व्यावृत्तिः, तयैव घटादिभ्यो व्यावृत्तः सिद्धः । तत्र व्यावृत्त्यन्तरानवस्थायां न किञ्चिद् विघटितम् । व्यावृत्तिव्यावृत्तिपरम्पराग्रहणोपक्षीणशक्तित्वाद् वस्तु व्यावृत्तं न सिध्यतीति चेत्—न, *विशेषणविपर्यस्तानामपि ग्रहणानभ्युपगमादिति । तत्राप्युच्यते, [§ 569]

---

१ ध्वंसात्] पलिध० अ
१ स्मान्नैष] कर्मान्नैष आ
१ ति] चकालोप० आ
२ रूपः] रूपः विच्छिन्न० आ
६ स्थेत्येके] ०वस्थात्येके आ
७ कान्तं] काष्ठान्तं आ
१० त्र] तत्रेति नास्ति आ
१० तु] ०माचरन्त आ
१३ त्ति] भावो भिनत्ति इति नास्ति आ
१७ यासिद्ध] ०सिद्धि आ
१९ द्] यत्तावद् अ
२२ *] विशेषण० इति नास्ति आ
२२ पि] विणानामपि अ

स ह्यस्तु नाभ्युपगमोऽत्र परम्पराया भावस्य
तद्ग्रहपरम्परयास्तमाप्तेः ।
नेष्टं विशेषणविशेषणवेदनं चेत् न्यायः समान इति नैष ततो
विभागः ॥§ 571

अगृहीतमपि किल विलोचनं ग्राहयति रूपमिति तद्विशेषणविशेषणमगृहीतमपि विशेषणं ग्राहयतीति मन्यमानस्य प्रथममपि विशेषणमगृहीतमेव ग्राहयिष्यति विशेष्यमिति कृतं तद्ग्रहणेनापि । न चायं विशेषणक्रमः । ततो यथा प्रथममेव विशेषणग्रहणमनपेक्ष्य लक्षयितुं विशेष्यमशक्तं तथा 56a/jnams द्वितीयाद्यपीति कथमयं विभागः शोभामभ्येति ?* यथा ह्यभावोपाधिग्रहणमन्तरेण सङ्कीर्णग्रहणभीतिः, तथा सोऽप्युपाधिरसङ्कीर्णोऽगृह्यमाणः कथं परभेदको नाम, स्वयं विष्टम्भिद्रव्यवत् ? एवं परम्परापेक्षायां व्यावृत्तवस्तुनः कल्पैरपि ग्रहणाभावादस्तमयो दुर्वारः । § 572

यदि च विशेषणमभावः तदा स्वहेतोरेव भिन्नभावसंभवे भिन्नदर्शनविकल्पनयोरर्थापत्त्या सिद्धेः किमभावेन ? न हि भिन्नमभिन्नमनुभवितव्यमभ्रान्तप्रत्ययेन । *नापि भिन्नमनुभूतं भिन्नसङ्कल्पविरोधि । अथाभावमन्तरेण न भिन्नं नाभिन्नं, क्व तर्हि कारकव्यापार इत्यभावः कारक एव स्वीकृतो भवति । तथापि स्वहेतोरेव भिन्नोत्पत्तौ सर्वमविरुद्धमिति नोपाधिवादः संवादविषयः । § 573

यच्चाह—अथवा निर्विकल्पकज्ञानेन व्यावृत्तिव्यावृत्त्यानन्त्यमपि गृहीतमिति, तत्रापि, § 574
142

निर्भासमाह यदयं हृदि निर्विकल्पे तत्
कौषिकावरणमप्यजहादलज्जः ।
यत्रैकमप्यनुपलभ्यमभावनाम्ना स्वव्यापिनी स्फुरति तत्र
परम्परेति ॥§ 576

---

१ स्तु] सत्यन्तु अ
१ माप्तेः] ०स्तनाप्तेः अ
४ तीति] विशेषं ग्राहमिष्यतीति आ
५ कृतं] कुतः आ
७ पीति] द्वितीयाद्यापीति आ
७ *] शोभासम० अ[[Reference of note not clear from print.]]
८ था] ग्रहक्षीतितया आ
११ दा] तद आ
१३ येन] ०मात्रान्त० आ
१३ *] नान्तेपि आ
१३ विरोधि] विरोधे अ
१३ रेण] ०मन्तरेणभिन्नन्नभिन्नः अ[[Reference of note not clear from print.]]
१४ नाभिन्नं] विशेषण० इति नास्ति आ
१५ मिति] सर्वविरुद्ध० अ
१७ पि] ०नन्त्या० र
१९ त्] कोषिका आ
२० नाम्ना] नाम्ना० आ

सोऽयं न यः समयतो यदि भङ्गभागी भावानवस्थितिरियं न
च पर्युदासः ॥§ 592

यदा हि मूर्तामूर्तसप्रतिघाप्रतिघसनिदर्शनानिदर्शनदूरासन्नस्थूलसूक्ष्मादिप्रकारेषु कश्चिद् भावमभावं वा कश्चित् स्वेच्छावशादभिदधीत । विन्ध्यवन्ध्यासुतादिकम् अभावभावं वा, तदायातमव्यवस्थानं भावस्य । न चैवं क्षतिः । स्वसमयानुरोधात् अभिधानभेदसंभवात् । केवलं किमिदानीं 57b/jnams
पर्युदस्तं वस्तु व्यवह्रियताम् ? तस्मात् समयानुरोधादभावशब्दाप्रवृत्तावपि एकस्य कारणापेक्षसंभवस्योपालम्भभाजो वा, अन्यस्तादृगेव पदार्थः पर्युदस्तो वक्तव्यः । तत्कथमभावशब्दसङ्केतमात्रेण पर्युदासव्युदासः ? यदि पुनरुपलम्भसंभवावप्यभावाभिमतस्य समयमात्रतन्त्रावित्युच्यते, तदा वास्तवः प्रसज्यप्रतिषेध एवायं न पर्युदास इति न दोषः । अनेन तु न्यायविन्मानिना न्यायागतं तमेव प्रकारमुल्लङ्घ्य संभवोपलम्भार्थक्रियाशक्तयश्चाभावस्य भाविक्यः अभ्युपगन्तव्याः । पर्युदासप्रत्यनीकप्रसज्यप्रतिषेधता चेति किमतोऽपि व्यसनमनवसानमन्यत् ? § 593

यच्चायमाह, न ह्युत्पत्तिर्भावस्य लक्षणं येन निवृत्तिर्भवन्ती भावः स्यादनुत्पत्तिमतामप्याकाशादीनां भावत्वादिति । तत्रापि, § 594

पाणिनेर्न नदी गङ्गा यमुना च स्थली नदी ।
अभवन्नपि भावोऽस्य न भावोऽस्य भवन्नपि ॥§ 596
145

नरः स्वातन्त्र्यमापन्नो यदिच्छति करोति तत् ।
उभयत्र समानोऽयं न्यायो न्यायविदां मतः ॥§ 598

नदीसंज्ञानिषेधेऽपि नावगाहस्य बाधनम् ।
*भावसंज्ञानिषेधेऽपि पर्युदासो न बाध्यते ॥§ 600

उपलम्भार्थशक्तस्य कारणापेक्षजन्मनः ।
सर्वस्य पर्युदस्तत्वं वस्त्वन्तरमपेक्ष्य हि ॥§ 602

अभावसंज्ञाविरहे पर्युदासव्यवस्थितिः ।
न क्वापि सिध्येत् सर्वत्र संज्ञायाः सुलभत्वतः ॥§ 604

१ भागी ] भङ्गभङ्गे अ
२ हि ] ०मप्रतिष्ठाप्रतिघ० आ
३ श्चिद् ] कश्चित्कश्चित अ
३ श्चित् ] कश्चित्कश्चित् अ
४ वा ] ०मभावमभावम्वा अ
८ व्यः ] पर्युदस्तो वक्तव्यः इति नास्ति र
११ ङ्घ्य ] ०पालम्भ० अ
१५ प्याकाशादीनां ] ०मत्ता० र
१६ पाणिनेर्न ] प्राणि अ, र
२१ * ] अभाव आ
२५ संज्ञायाः ] संज्ञयाः आ

नमात्रप्रतिपाद्ये हुतभुजि नेह शीतमित्येव साधु, न तु नात्र शीतं वह्नेरिति तद्वदेतदपि ॥ § 628

अथान्यच्चिन्त्यते, § 629

नालं निषेधविधये यदि पर्युदस्तमन्योपलब्धिरितरस्य कथं निषेद्धी । 58b/jnams
नष्टो घटः स इति वा भवतो विकल्पाकारः कथं घटनिषेधनमादधाति ॥§ 631

अत्रोत्तरं, § 632

नेहास्त्यसाविति विकल्पमभिप्रसूतेरन्यो निषेधविधिरन्यधियो न तावत् ।
*नाभावकल्पनधियोऽप्यविशङ्किताया मानाङ्गभावमवधूय निषेधकत्वम् ॥§ 634 149

सतो विनाशनं नाम नोपपन्नमितीरितम् ।
नासतः करणे शक्तिरनिष्टा वस्तुनः सतः ॥§ 636

ततः प्रतियोग्यनुभवः प्रतियोग्यन्तरविरहविकल्पमुत्पादयेदिति नेहानुपपत्तिः । न च तन्मात्रादन्योऽप्यनुभवस्य परिनिषेधनव्यापारः । यस्यापि विकल्पस्य नष्टो घट इत्येवमाकारस्य वा निःशङ्कगमनादौ तदर्थक्रियान्विततया प्रवृत्तिव्यावृत्त्यवस्थायां वा निमित्तभावान्नान्यनिषेधकारित्वम् । एवं वचनस्यापि तद्विकल्पोत्पादनद्वारकमेव निषेधसाधनत्वं द्रष्टव्यम् । § 637

एतेन अथ नास्तीति ज्ञानमेवानुपलम्भः, तदपि वस्तुसत् कथं वस्त्वन्तरप्रतिषेधस्य विषयः स्यादित्याद्यवकरपरिहारः सिद्धः । § 638

न च नास्तीति ज्ञानमनुपलम्भोऽस्माकं, किं तु प्रतियोग्युपलम्भो निर्विकल्प एव, नास्तीति ज्ञानं तु मनोव्यवहाररूपं तत् फलमेव । किं चैवंविधनिर्बन्धेन वस्तुचिन्तायामनुपयोगात् ? *यदप्यस्य नास्तीति ज्ञानविषयनिरूपणम्, तदप्यसदिति निरूपणेन गतार्थम् । यत्तु तद्विविक्तभूतलादेर्विषयत्वमाशङ्क्योक्तम्, न भूतलादेर्वस्त्वन्तरत्वात्, न च वस्त्वन्तरे प्रतिपादिते प्रतीते

---

४ स्य ] ०रितस्य अ
७ साविति ] ०विति इति नास्ति अ
७ त् ] न भवेत् आ
८ * ] ०कल्पा० आ
८ ङ्किताया ] ०शङ्क्याना० अ, नाङ्गतभाव० आ[[Reference of note not clear from print.]]
९ तो ] सत्ता० अ
१० तः ] नाशतः अ
११ तः ] तत् आ
१३ स्य ] ०सकारस्य आ
१३ या ] ०र्थितया आ
१४ स्थायां ] ०व्यावृत्ता० आ
१४ वा ] ०भावान्य० अ
१५ स्यापि ] वचनमपि आ
१९ तु ] माना० आ
२० * ] यद्य० आ
२१ त्तु ] ०विभक्त० आ
२२ तिपादिते ] वस्त्वन्तरप्र० अ

वाद्यघटादिवस्त्वन्तरमभूतमिति प्रतिपादितं प्रतीतं वा भवति । एवं हि वस्त्वन्तरं हि नाश इत्येतस्मिन् मते यद्दूषणमुक्तं तत्तु स्वयमेव परिहृतं स्यादिति । तदप्यसंबद्धम्, केवलं हि भूतलमस्य विषय इति कथं न घटादेरभूतत्वबोधः, यैव हि घटाद्यपेक्षया कैवल्यावस्था प्रदेशस्य स एव घटविरहः । वचनादिनाप्येवं केवलं प्रदेशप्रतिपादने कथमिव न प्रकृतघटाद्यपेक्ष्य भावप्रतिपादनम् ? एवं यदि कर्परादिवत् केवलस्य नाशस्याप्युपलम्भः स्यात्, भवतु घटो निषेधप्रतीतिः घटनिषेधस्तु केन कृतः ? पूर्वं सन्नेव हि घटाभावः तद्द्वारेण प्रतिपत्तव्यः, न हि प्रदेशेन घटाभावो जन्यन्ते, किं तु सन्नेव घटाभावः तद्द्वारेण निश्चेतव्यः यदि हि घटोऽपि न स्यान्न प्रदेशैकरूपनियता
150 प्रतीतिरिति । एवं यथा यदि घटोऽद्यापि स्यान्न कर्परैकरूपनियता प्रतिपत्तिस्तथा न नाशैकरूपनियता प्रतिपत्तिरिति बलाद् घटाभावनिश्चयो भवतु यदि पूर्वं घटाभावः स्यात्, स च नास्ति । तद्भावेऽपि किं नाशेन, कपालेनैव
59a/jnams प्रतियोगिना गतार्थत्वात् ? न च नाशप्रतीतिरप्यस्तीत्युक्तम्, तस्मात् सतः प्रध्वंसने सद्रूपेणासद्रूपेण वा दूषणमुक्तं कथं सद्रूपेण सतोऽसतो वा निश्चये कर्तव्ये स्यादिति न समानः परिहारः । § 639

यत्त्वाह, न च तद्विवेकाप्रतीतौ तद्विविक्तग्रहणं भवति । तद्विवेकश्च न भूतलादिस्वरूपमेव, विशेषणत्वादिति, तत् न्यायबहिष्कृतम् । विशेषणविशेष्यभावोऽपि सङ्कल्पारूढे रूपे । स च,

भिन्नं भावमभिन्नमाकलयति व्यक्तं तदन्यात्मना जिष्णु
स्फारकदम्बडम्बरमिव स्वांशैरनंशं जगत् ।
किं च स्वाकृतिमात्र एव विषयव्यामोहदोहक्षमः सङ्कल्पः
परमैन्द्रजालिक इव व्याधूतभूतस्थितिः ॥§ 642

यथा हि भिन्नं भावमेकीकुर्वन्नुत्पद्यते, तथाभिन्नं भावं भिन्नमाकलयतीत्यप्यर्थः, यथा शिलापुत्रकस्य शरीरम्, *शरीरे करचरणादयः लम्बकर्णो देवदत्त इत्यादि । तस्मात् कल्पनाधीनो विशेष्यविशेषणभावोऽभिन्नोऽपि भावे भेदविवक्षापेक्षव्यवहारः कथं *भेदनियतमात्मानमातनोति ? स्खलद्र-

१ तीते] प्रतीते वाद्य० नास्ति आ
१ मिति] ०न्तर इति नास्ति आ
४ या] द्युपेक्षया अ
४ स्था] ०कै वस्था० आ
५ लं] केवलमिति योजितम् अ
५ पेक्ष्य] पटाद्यभाव० आ
६ त्] कर्पूरादिवत्, अ कर्परवत् आ
७ केन] हृतः अ
९ न] नकारो नास्ति अ
१० टोऽद्यापि] घटाद्यपि अ
१३ च] नाशयतीति आ
१४ ये] निश्चयाय आ
१६ तीतौ] ०प्रतीतो आ
१९ नंशं] शैरेशं आ
२० एव] दाह० र
२० इव] भूत० इति नास्ति आ
२१ भावं] ०माक्रमति आ
२२ *] शरीरकर० अ
२४ हारः] ०पेक्ष्य आ[[Reference of note not clear from print.]]
२४ *] ०नियमा० आ

तिरयं राहोः शिर इत्यादिनिर्देश इति चेत् ? यदि सत्यमेतत्तदा भिन्नस्य साक्षादनुपलम्भादेव । इयं च गतिर्घटविवेकाख्यपदार्थान्तरापेक्षयाप्यस्ति, तथापि नेति कोषपानं प्रमाणम् । तस्मात् स घटाभप्रदेश एव अयमन्यो घटविविक्तो न तु घटविवेकेन भिन्नेन विशेषित इति । § 643

तस्माद् यद्यपि किञ्चिद् विशेषणं भिन्नमेव दृष्टं वाहादि, तथापि नायं नियमः, विपर्ययस्यापि दर्शनात्, संभावनाच्च बाधकादर्शनात् । विवक्षापरतन्त्रता तु दृष्टान्तसंभावनाबीजम् । तदेवं न वाच्यं विशेषणविशेष्यादर्थान्तरत्वाद् वाहादिवदिति । किं च,

व्याप्तं भिदा यदि विशेष्यविशेषणत्वं *भेदात्ययान्ननु तदा
तदभाव एव ।
देशो विशिष्ट इति नास्ति यथा तथेदमप्यस्ति 151
दृश्यमतभेददृगस्ति नेति ॥ § 646

न च दृश्यानुपलब्धेः प्रमाणात्मनो विशिष्टव्यवहारमात्रेण स घटादन्य इत्यर्थनिष्ठेन बाधः, किं तु तथैवास्येति । § 647

यच्चाह, अभेदेऽपि न प्रमाणं किञ्चिदस्तीति, तदनुन्मीलिताक्षस्यैव साम्प्रतम्, अन्यथा प्रत्यक्षोदयस्य निवारयितुमशक्यत्वात् । § 648

यच्चेदम् यदि च घटो नास्तीत्यस्य संज्ञानस्याभिधानस्य च भूतलमेव विषयो न च ततोऽन्यो घटाभावः, तदात्र घटोऽस्तीत्यस्यापि भूतलमेव विषयः स्यात् । घटोऽपि न ततोऽन्यः कल्पनीयः, तथोत्पादेन विशिष्टं भूतलमेवोभयत्राप्यस्तु । न चैतद्युक्तम् । यस्माद् घटसद्भाववद्घटासद्भावेऽपि भूतलतोऽन्यः प्रतिभाति, एवं हि विधिप्रतिषेधयोः प्रयोगोऽप्यर्थवानेव भवेदिति तद्वरं जनुषान्धो, न पुनरयं दुर्नीतिदग्धबुद्धिः । अभाववत् किल कलसोऽपि कल्पनामात्रविषयो न लोचनगोचर इति किमत्र ब्रूमः ? सकुम्भमुद्भूतं भूतलम् इत्यपि सहितोत्पत्तिरापद्यते, न रूपसङ्करः, भेदोपलम्भस्य भिन्नार्थ- 59b/jnams
क्रियानियोगस्य च दुरपह्नवत्वात् । तद्वन्नाभावोऽपि भूतलकपालादिभ्यो भिन्नः प्रतिभातीति चिन्तितमेव । किं च, § 649

किमिह कलसध्वंसो दृश्यो न वेत्युदितो जनो वदतु
समयस्मृत्या दृष्टिं विमर्शपराङ्मुखः ।

३ स] घटात् अ
७ तु] दृष्टान्त इति नास्ति आ
९ *] ०त्याया० आ
१० स्ति] दृश्यसत् र
१२ निष्ठेन] ०मिष्टेन आ
१२ थैवास्येति] किन्त्वनयेवा आ
१३ स्यैव] ०तार्थस्यै० अ
१५ स्य] ज्ञान० आ
१७ न] नेति नास्ति आ
१८ स्माद्] ०सद्भाववद् घटा० इति योजितम् अ
१९ वेदिति] ०व भ० नास्ति आ[[Reference of note not clear from print.]]
२० यं] दुर्णीति० आ
२२ न] शङ्करः आ
२३ स्य] क्रियादि० आ
२३ च] चकारो नास्ति आ
२५ दृष्टिं] विमर्ष० अ

कलयसि पुनः कांस्कानर्थानिहेति परं यदि प्रदिशति
धरादिभ्यः सभ्यस्त्वमेव वयं न तु ॥§ 651

ततो विधिप्रतिषेधप्रयोगयोरपि कानुपपत्तिः, अवस्थाद्वयप्रतिपादनात् ? तथा च जालान्तरेण प्रविष्टालोकस्याभावो भिन्नदेशो भासमानः किमपह्नोतुं शक्यः ? केवलम्, § 652

विच्छिन्नः स्फुटनीलकान्तिकलितः तावत्प्रदेशस्थिति—
भिन्नार्थत्वविनिश्चयात्तु स इति प्रख्यातिनामान्तरः ।
152 आलोकस्य यथा तथान्यविरहोऽप्यात्मस्वरूपस्फुटीकारे किं
कलसः किमातपभिदाध्यक्षेति चित्रं महत् ॥§ 654

न हि सूक्ष्ममीक्षमाणेऽप्यत्यन्तविचित्रस्य भावराशेरभावानां संबन्धिभेदाद्भेदोपचारमन्तरेण सूक्ष्मोऽपि स्वभावभेदस्तम इवोपलम्भगोचरः । तद्वरमालोकविवेकोऽपि सकलान्यविवेकवदनालोक्य एवास्तु, तमस्तु वस्त्वेवेति गृहाण । किमङ्ग कष्टसंकटे सुखिनमात्मानमावेशयसि ? § 655

ननु निमीलिताक्षस्यापि तादृङ्नीलप्रतिभासः संभवी, न च नीलमर्थमुपस्थापयतीति । तदयुक्तम्, कृष्णवर्णान्तरस्य सर्वस्याप्यभावप्रसङ्गात् । अन्यादृशमेतत् कृष्णान्तरं कलयापि निमीलिताक्षप्रतिभासादिति चेत् ? अन्धकारोऽपि तर्हि पुनः परिमितदेशो विचित्रसंस्थानः प्रतिभासमानः स्फुटतरं निमीलिताक्षप्रतिभासाद्भिन्नरूप एवानुभूयते, एकरसश्च निमीलिताक्षप्रतिभासः, अन्धकारस्तु कदाचित् किरणपरमाणुनिकरसङ्करकाले विरलरूपः, अन्यदा घनो धनतरो वेति कथं साम्यम् ? कृष्णतामात्रं पुनरन्यत्रापि साधारणम् । § 656

अन्यत्र नीलवर्णे वस्तुनि स्पर्शान्तरसहचारः अवश्यम्भावीति चेत्— न, इन्द्रनीलादिमणिकिरणजालके तदभावात् । *अनुपलक्ष्यस्तत्र स्पर्श इति कल्पनं नान्धकाराद्भिभेति । तस्माद्रूपमात्रमुभयमस्तु । न हि दृष्टेऽनुपपन्नं नाम । यदि चाश्रयोऽवश्यमृग्यः मणिकुड्यादिकमस्त्येव । न च वस्तुव्यवस्थायां प्रत्यक्षप्रतिभासमाश्रयतः प्रतिभासविप्लवेन व्यभिचाराभिधानं धीमतो धिनोति । अन्यथा वातपित्तक्षोभादिना ज्वलितस्तम्भादिसंदर्शनात् सत्यमपि

१ रं] ०निहेपरं आ
३ च] तथात आ
५ इति] प्रख्यात० आ
६ सः] मातपे० आ
६ क्षेति] विपदक्षेति अ
७ हि] ससु?सूक्ष्म० अ
७ स्य] ०माणोप्यन्ते० अ
९ एवास्तु] ०लोकवास्तु आ
१० सि] ०शयति अ
११ स्यापि] ०दृशशील० आ
१३ यापि] कलायापि आ
१४ र्हि] तर्हीति नास्ति अ
१९ त्र] ०वर्ण० आ
१९ चारः] ०चरो आ
२० के] ०जातके अ
२० *] ०लभ्य?अ
२१ काराद्भिभेति] नार्थकरोतर्षितेति आ
२२ मृग्यः] च अयोऽवश्यमृतः आ वाश्रयो अ
२३ तः] ०भासना० अ
२४ धिनोति] धीनोति अ
२४ नात्] ०दर्शनात् आ

प्रमाणगोचरस्य पक्षीकरणे प्रतिज्ञाया अनुमानबाधा । अगोचरे चाश्रयस्वरूपयोरसिद्धिरिति स्थितम् । § 666

यत् पुनरयं भगवतो भाष्यकारस्य प्रत्यक्षतः क्षणभङ्गसिद्धिमनवगाहमानः अनुरूपविकल्पाभावोद्भावनमात्रसारेण विस्तरेण दूषणमभिलषन्नपभाषणप्रमादमाचरति, तदस्य चटुलवटुभावसुलभमनात्मज्ञताविष्करणमात्रमिति म- 155
न्तव्यम् । तथा हि प्रत्यक्षसिद्धं क्षणिकत्वमिति न प्रत्यक्षव्यवहृतम्, अनुरूपविकल्पानुदयात् । किं तु प्रत्यक्षगृहीतम्, व्यवहारत्वानुमानात् । तच्चानुमानं यदि स्वयं कुतश्चिल्लिङ्गात् प्रसाध्य प्रत्यक्षेण क्षणभङ्गग्रहणव्यवहारमादधीत सामर्थ्यात्, तदा न विशेषः सत्त्वाद्यनुमानवत् । अर्थतो हि तदा प्रत्यक्षेण क्षणभङ्गग्रहणमवस्थाप्यमानं स्वपौरुषस्पर्शाभावात् न प्रत्यक्षतः क्षणभङ्गसिद्धिप्रसिद्धिं पुष्णाति । यदा तु प्रमाणान्तरसिद्धमध्यक्षस्य क्षणमात्रस्थितिग्रहणमाश्रित्य व्यवहारमात्रसाधनमनुमानं पृष्ठजविकल्पनिर्विशेषं तत्पौरुषमेव दीपयदुत्पद्यते, तदा प्रत्यक्षतः क्षणभङ्गसिद्धिरिति मुख्यमाख्यायते । तदयमर्थः, § 667

क्षणित्वमध्यक्षधियाधिपातं पातं पुनर्न व्यवहारमेतत् ।
अतः समक्षग्रहसाधनेन प्रसाध्यते तद्व्यवहार एव ॥ § 669

क्षणभङ्गेऽन्यदासिद्धे प्रत्यक्षेण ग्रहस्थितिः ।
प्रत्यक्षेण ग्रहादस्य क्षणभङ्गव्यवस्थितिः ॥ § 671

तथा हि, § 672

यन्निर्भाति यथा तथा तदखिलं गङ्गाम्बु गौरं यथा नोचेन्न
प्रतिवस्तु शक्तिनियमः सङ्कीर्णभावे भवेत् ।
संस्काराः प्रतिभान्ति चेन्द्रियमतिष्वेकक्षणस्थायिनः
स्यादेकक्षणवीक्षणादितरथा दृष्टस्त्रिकाली कलः ॥ § 674 61a/jnams

लिङ्गरूपोपपत्तिव्यवकीर्णोऽयं स्वभावहेतुप्रयोगः । अत्र च सपक्षे सद्भावान्न विरोधदोषः । द्वितीयपादेन चानेकान्तपरिहारः । तथा हि, निर्भानं प्रत्यक्षे प्रतिभानमुक्तम्, ततो यावता विशेषेण पदार्थः प्रत्यक्षे प्रतिभासमासादयति तन्नियमपरिहारेण यदि स्वरूपस्थितिमाभजेत तदा सर्वसङ्कीर्णमस्य रूपमिति सर्वत्र सर्वोपयोगादिप्रसङ्गः । अतः स्वरूपनियमे प्रमाणापेक्षायां

---

५ मिति ] ०नात्म्य० अ
६ म् ] हतम् आ
९ र्थ्यात् ] सामर्थ्यते र
९ विशेषः ] तत्त्वाद्य० अ
१० क्षेण ] ०भङ्गि० र
१० तः ] प्रत्यक्षमतः अ
११ स्य ] ०स्थित० र
१५ धियाधिपातं ] ऽविपातं आ
२० नोचेन्न ] नोचेत्प्र० र
२१ संस्काराः ] स्वकाराः ?
२३ पादेन ] नाने० अ
२४ ता ] यावतो आ
२६ माणापेक्षायां ] ०पेक्षया आ

...3 अन्यथाऽसंभवादिति व्यतिरेकोऽयमेव सः ॥ ३ ॥§ 1523

...umbered न स्थितं तत्र नान्यस्माज्जातं नायातमन्यतः ।
यस्य भावे भवेत् कार्यं न चेत्तस्य न कस्यचित् ॥ ४ ॥§ 1525

एतच्चानुपलब्धिपूर्वेण सिद्धमध्यक्षेणेति न किञ्चित् पश्चिमद्वयेन । तदपि हि हेत्वभावे फलस्य तत्र स्थितिमन्यत उत्पत्तिमन्ययत्नेनान्यत्र गमनम् बाधमानमेव व्यतिरेकसाधनम्, न पाश्चात्त्यद्वयमित्येव, तद्व्यापाराभावे शतेनाप्यभावात् । तच्चादिमेन एकेन कृतमिति नापरस्योपयोगः । § 1526

अथ पुनरभावमात्रमादिमोऽनुपलम्भः प्रत्येतीति मतिः, § 1527

...5 अभावमात्रबोधेऽपि प्राच्यस्यानुपयोगिता ।
अस्यैतद्व्यापृतेः प्रागित्येवं किमवशिष्यते ॥ ५ ॥§ 1529

अभावमात्रप्रतीतौ तावत् कस्य केनान्वयः ? अस्य भावेऽस्य भाव इत्यप्यन्वयप्रतीतिर्यदृच्छोपनतेनातिप्रसज्यमानोपयोगपरिपन्थिन्येव । एतद्व्यापारात् पूर्वमभावः अस्येति तु प्रतीतौ सैव त्रयी गतिरायातेति किं परिशिष्यते, यतोऽन्तिमद्वयं न वैफल्यमावहेत् ? § 1530

...6 अन्वये व्यभिचाराच्चेद् व्यतिरेकोऽनुगम्यते ।
प्रत्यक्षमात्रव्यापारेऽप्येवं किं नाभिधीयते ॥ ६ ॥§ 1532

यदर्थमर्थ्येत प्राक्तनः अन्वयव्यतिरेकौ हि प्रत्येकं व्यभिचारादेव सहितौ हेतुफलभाव उच्यते । तत एकैकस्यातद्भाविन्यपि संभवोऽबाधक एवेति
319 समानमावयोः । ततो नान्त्ययोरादिमस्योपयोगः, आद्ये वान्तिमयोरिति सिद्धम् । न सिद्धम् । आदिमेन हि प्रागस्य व्यापारादेतन्नासीदिति प्रतियन्नपि एतद्व्यापाराभावप्रयुक्तोऽस्याभाव इति नावधारितम्, चरमेण त्ववधार्यत इत्ययुक्तम्, आदिमस्य पुनरनुपयोगस्य तादवस्थ्यात् । § 1533

अपि च, § 1534

...7 तन्मात्राभावतोऽभावात् पश्चिमेन विनिश्चयः ॥
तन्न्यायस्य समानत्वात् प्राच्येनापि न किं मतः ॥ ७ ॥§ 1536

एतद्व्यापारात् प्राग् नासीदित्यपि हि तन्मात्राभावादेवाभावं ख्यापयति, यथोक्तसत्तात्रैविध्यविधूतेराक्षेपात् । ततस्तेनानिश्चये पश्चिमेनापि मा भूत् । तत्र पूर्वेण द्वयोः अभावस्य सन्निधिमात्रम्, नैकस्यानेन प्रयुक्तिरिति पश्यतः पश्चिमेऽपि क आश्वासः ? तदनायत्तौ तदभावेऽपि उत्पत्तिप्रसङ्गे द्वितीयाभावस्यैवायोगः समानः । अथ वह्निरासभयोरागमनानन्तरजन्मनोऽपि

२२ स्थ्यात्] दङ् पोहि आदिमस्य यङ् पुनः दोगस् प मेद अनुपयोग दे ञिद् ल गनस् पहि पियर् रो तादवस्थ्यात् । मातृकात्र संदिग्धपाठा ।

२९ त्तौ] रग् म लस् प अनायत्ति ? मातृका संदिग्धपाठा ।

तस्य सन्देहवत्त्वेऽपि प्रकाशे ज्ञानता स्थिता ॥§ 1808

एवं प्रकाशमानस्य ज्ञानत्वे प्रतिपादिते ।
क्वचित् सर्वत्र वा वादादलीकत्वेऽपि बोधता ॥§ 1810

ज्ञानमेव ततः सत्यमलीकं वा बहिर्न तु ।
बहिरप्यस्तु वा वस्तु प्रकाशस्यास्तु बोधता ॥§ 1812

360

भेदाभेदविकल्पोऽपि न प्रकाशस्य बाधकः ।
न वा यथोक्तसाध्येन व्याप्तेरिति किमर्थकः ॥§ 1814

परेण परसंवित्तिं योऽभिमन्येत तं प्रति ।
शेषं स्यादपि दोषाय ब्रूमः स्वप्नेऽपि न त्विदम् ॥§ 1816

एकानेकत्वविरहात् निःस्वभावमिदं जडम् ।
यथा तथा न किञ्चित्तं सत्तैकस्य कथं ततः ॥§ 1818

प्रकाशमानं नीलादि जडं वाजडमेव वा ।
इति प्रकरणेऽस्माभिर्बुद्धित्वे हेतुरुच्यते ॥§ 1820

तत्रैकानेकविरहो यदि धर्मान्तरार्पकः ।
किं नश्छिन्नं तावतापि नीलादेर्जडता न हि ॥§ 1822

सत्तायां ननु सिद्धायां जडं वाजडमेव वा ।
असत्तुरङ्गशृङ्गादि न हि तत्त्वेऽनुमीयते ॥§ 1824

तथाप्यप्रस्तुतमिदं सत्ताचिन्तावियोगतः ।
सिद्धायामेव सत्तायां विशेषश्चिन्त्यते यतः ॥§ 1826

सत्तायां संशयेऽप्यस्मात् सच्चेद् विज्ञानमेव तत् ।
ततश्चादूषणाख्यातिरसत्तासिद्धिबाधयोः ॥§ 1828

प्रसिद्धिमात्ररूपेण धर्मित्वान्नाप्यनाश्रयः ।
अन्यथा निःस्वभावत्वहेतोरप्याश्रयः कथम् ॥§ 1830

तस्मिन्न भावमात्रं चेत् ज्ञानतामात्रमत्र च ।
बाह्यवस्तुत्वसिद्धिस्तु द्वयोरपि विरोधिनी ॥§ 1832

वस्तुतोपाधिबोधत्वं साध्यमत्र त्वयेति चेत् ।
बोधत्वमात्रप्रस्तावे विशेषः कुत ईदृशः ॥§ 1834

ज्ञानत्वं वस्तुताव्याप्तं तदभावे भवेन्न चेत् ।
विरुद्धाव्यभिचारः क्व दोषो यद्वास्तु वस्तुता ॥§ 1836

361

किं च प्रकाशमात्रात्मव्यतिरिक्तान्यथाथवा ।
सत्ता निषेध्याभिमता निःस्वभावत्वहेतुना ॥§ 1838

निषेधे व्यतिरिक्ताया न प्रकाशात्मवारणम् ।
अस्यैव वारणे केन वारणाध्यक्षभासिनः ॥§ 1840

अनुमानं प्रमाणत्वाद् बाधकं यदि कस्यचित् ।
प्रत्यक्षमपि तद्भावात् साधकं किं न कस्यचित् ॥§ 1842

अवश्यमन्तेऽध्यक्षस्य प्रामाण्यमनुमाश्रयेत् ।
प्रकाशमात्ररूपे च नानुमापेक्षमक्षजम् ॥§ 1844

अथायमनुमानस्य विषयोऽक्षधियोऽपरः ।
प्रकाशरूपेऽध्यक्षत्वादनुमावसरः कुतः ॥§ 1846

अथ प्रत्यक्षसिद्धं यन्न तस्यैव निराक्रिया ।
व्यावृत्तिभेदः कश्चात्र विचारासहता यदि ॥§ 1848

विज्ञानस्यैव धर्मोऽस्तु शशशृङ्गसमं बहिः ।
अर्थशक्तिवियोगे वा धर्मोऽस्तु धिय एव सः ॥§ 1850

अर्थशक्तिवियोगश्च विचारासहता च सा ।
ज्ञानस्यैव न बाह्यस्येत्यर्थ्यते किमतः परम् ॥§ 1852

प्रकाशस्यैव चिन्तेयं तद्गन्धोऽपि बहिर्न हि ।
तन्नागशृङ्गसाम्येऽस्य सिद्धे किं न कृतार्थता ॥§ 1854

बहिर्वदवभासेषु प्रज्ञप्ता रूपराशिता ।
संस्काराद्वेदनासंज्ञेअभिन्ने किं न भेदि ते ॥§ 1856 71b/jnams

स्वीकृता तेन सेत्यस्मात् तन्मत्या बोधनं यदि ।
72a/jnams अबाधनेऽस्याः स्वीकारात्तद्धियाबोधनं कथम् ॥[§ 1906]

साध्यं न किञ्चिदिति चेत् बाधाया अपि साध्यता ।
सापि नेति वचो व्यर्थं प्रश्नमात्रेऽपि किं फलम् ॥[§ 1908]

364

फलं यदि गिरः क्वापि नान्यत् तच्चावबोधनात् ।
वाचः प्रत्यायने शक्ता नाक्षधूमादि सुन्दरम् ॥[§ 1910]

यदि हेतुफले संवृत्तद्भावः केन गृह्यताम् ।
फलाच्च हेतुधीर्नूनं न चेद् व्यर्था व्रतादयः ॥[§ 1912]

योऽपि तापार्दितोऽभ्येति चन्दनं न हुताशनम् ।
वक्तुं किञ्चिदनाश्रित्य सज्ज्ञानं तु न वर्तते ॥[§ 1914]

वस्तु किञ्चिदुपन्यस्य न्यस्यन्ते यदि युक्तयः ।
शास्त्रे पक्षग्रहः किं न नचेत्तत् केन गृह्यताम् ॥[§ 1916]

मोक्षमार्गं यदा पृष्टो व्याकुर्यात् शून्यभावनाम् ।
बोधयन् शून्यतां तर्हि गर्हेत्पक्षग्रहं कथम् ॥[§ 1918]

तस्मात् संवृतिमाश्रित्य साध्यं साधनमस्य वा ।
दुर्वारमिति दुर्वारः प्रमाणस्य परिग्रहः ॥[§ 1920]

*संवृत्तौ मानमिष्टं चेत् विचारोऽप्येष संवृतिः ।
संवृतावपि नेष्टं चेद् ब्रुवन् जेता यथा तथा ॥[§ 1922]

यथा हेतुफले संवृत्तथा संवादिधीरपि ।
अनुमामिच्छतोऽध्यक्षं नेति कोऽप्येष निश्चयः ॥[§ 1924]

स्ववेदने विवादश्चेत् न संवृत्यैव साधनात् ।
तस्मादपरमार्थत्वेऽप्यात्ता वित्तिः प्रबाधिका ॥[§ 1926]

संवृतिश्चेत् क्व निष्कर्षः परमार्थोऽस्तु तावता ।
ततश्च संवृतावेव सांवृतं त्यज्यते कथम् ॥[§ 1928]

१७ *] तुल० रत्न० निब० पृः ८९

तत्प्रकाशान्वयः सत्ताव्यवहारोऽस्तु चेतसः ।
न प्रकाशो न वा शक्तिर्यस्य तेन तुला कथम् ॥[§ 1930]

ततो विचारासहतादिधर्मैः
प्रकाशमानत्वमबाधमानः ।[§ 1932]

365

यदीष्यते चेतस एव सोऽस्तु
स्थिता प्रकाशान्मनसः प्रसिद्धिः ॥[§ 1934]

प्रकाशमूर्तेर्यदसत्त्वमुच्यते
स्वकल्पितं सत्त्वमपेक्ष्य न क्षतिः ।[§ 1936]

प्रकाशमेवेति परस्तु वस्तुसत्
समं द्वयं लौकिकसिद्धबाधने ।[§ 1938]

नासत्प्रकाशवपुषी न च सत्तदन्यै-
रेकेन न द्वितयमद्वितयं न ताभ्याम् ।[§ 1940]

इत्थं जगद् यदि चतुःशिखरीवियुक्तं
को भाष्यकारमतमध्यमयोर्विशेषः ॥[§ 1942]

अर्थक्रियापि परमार्थत एव येषां
येषां प्रकाशवपुषोऽपि निषेध एव ।[§ 1944]

तेषां भिदा भवतु किं तु निसर्गदुर्गो
मार्गोऽयमात्मविदि साहसभारसारः ॥[§ 1946]

तदेतत् परस्योत्तरप्रबन्धानुरोधेनं प्रासङ्गिकं किञ्चिदायातमित्यलं विस्तरेण । स्थितमेतत् प्रकाशमानत्वेन विज्ञानमात्रं त्रिभुवनमिति ॥ [§ 1947]

॥ समाप्तमिदमद्वैतबिन्दुप्रकरणम् ॥

366

# ११ ११ ॥ साकारसिद्धिशास्त्रम् ॥

367

नीलस्वभावाभिदुरप्रकाशकथनेन किम् ।
न हि तस्यैव बाधाया विरहं वक्तुमुद्यमः ॥ § 2004
372

74a/jnams नीलस्य स्यात् प्रकाशश्चेत्प्रकाशः किमतः परम् ।
परतोऽपि भवन्नस्य प्रकाशः शक्यवारणः ॥ § 2006

नान्यतोऽपि प्रकाशोऽस्य प्रकाशोऽस्यान्य एव चेत् ।
न तन्नीलं प्रकाश्येत प्रकाशेऽन्यस्य तस्य किम् ॥ § 2008

संबन्धस्य च बाध्यत्वात्तस्येति न समन्वयः ।
षष्ठ्या लाभेऽपि कथमप्यशक्यो रूपसंकरः ॥ § 2010

यतः कुतोऽपि वा तस्मात् प्रकाशोऽस्यानपह्नवः ।
तदबाधे च न फलं न तन्मात्रं च किञ्चन ॥ § 2012

प्रत्याशया त्वभिमतं प्रसिद्धमभिधीयताम् ।
आश्रयासिद्धिनिर्धूता हेतवोऽप्यत एव च ॥ § 2014

अबाध्यत्वप्रसिद्धार्थाः संकल्पकलितेऽथ चेत् ।
तस्यामर्थसमानत्वाद् विधिसिद्धौ न साधुता ॥ § 2016

अबाधयैव सत्त्वं चेत् सत्त्वे हेतुस्ततश्च सा ।
इति चक्रकमायातं मायामेतामपोहति ॥ § 2018

अथाप्यबाधा बाधायाः स्फुरणे सत्यपोद्यते ।
तदभावे तु सिद्धैव संदेहपदमीदृशी ॥ § 2020
वर्गधर्मत्वाश्रीयमाणो न चक्रकमतिक्रामति । § 2021

आश्रयोऽप्यस्तु हेतुस्तु कथ्यतां बाधबाधनः ।
स्वयंवेदनमेवाथ पृथग् नास्तीति दर्शितम् ॥ § 2023

न च स्ववित्तिरित्येव युक्तः संप्रत्ययोऽपि वः ।
स्ववित्तावपि नीलादेर्यदा बाधाभिधावति ॥ § 2025

स्वसंवित्तिर्न नीलस्य यदि किं न प्रकाशते ।
प्रकाश्यन्तां परेणेति न शक्यमिदमीदृशम् ॥ § 2027

शक्तेरनिश्चये तस्य कार्यतापि कथं ननु ।
वस्तुस्वभावः कार्यत्वं भिन्नव्यावृत्तिभागपि ॥[§ 2257]

अन्यथा किं न केशादेः कार्यताकार्यतैव चेत् ।
तर्हि प्रकाश एवास्तु सत्त्वमव्यभिचारतः ॥[§ 2259]

नारोपितानां कार्यं चेत् प्रकाशोऽपि न किं तथा ।
एकीकारात् प्रकाशश्चेत् कार्यतापि कथं तथा ॥[§ 2261]

फलाभावाद् यथा नाङ्गं नाङ्गाभावात् फलं तथा ।
ततो वस्तुत्वसन्देहे सन्देहः कार्यतादिषु ॥[§ 2263]

तस्मादभ्याससामर्थ्यात् सामर्थ्यस्य विनिश्चयः ।
प्रकाश एव सत्त्वं तत्कार्यं धीरेव तस्य वा ॥[§ 2265]

न च कार्यान्तरेणास्याः सत्त्वं किं तु स्वसंविदः ।
गोचरं हि व्यभिचरेन्न स्वं बुद्धिः कदाचन ॥[§ 2267]

कस्यचित् तत्र संदेहे कार्येऽभ्यासाद् विनिश्चयः ।
सत्त्वं ततो बहिरपि प्रकाशादेव तत्त्वतः ॥[§ 2269]

400

न क्षणित्वक्षतिश्चैवं ज्ञानेनैकक्षणग्रहात् ।
कादाचित्कं च तज्ज्ञानं लिङ्गं नित्यबलव्यये ॥[§ 2271]

उक्ता च शास्त्रे धीः सत्ता दृश्यस्यासत्त्वमप्यधीः ।
व्यपदेशार्थकृत्यादिहान्यपेक्षा विनाकृता ॥[§ 2273]

अशक्तिरपि तत्रेपि न बाधकमियान् पुनः ।
विशेषो दृष्टदृष्टी च सत्त्वासत्त्वे उदीरिते ॥[§ 2275]

कदाचित् कस्यचित् क्वापि प्रकाशोऽस्त्यनुमान्ततः ।
मृषा प्रकाशाभावस्तु विभाव्यो बहिरादरे ॥[§ 2277]

विकल्प एवानुमितेरभावेऽपि प्रकाशनम् ।
तादृशां यादृशी सत्ता प्रकाशोऽप्यस्तु तादृशः ॥[§ 2279]

अर्थक्रियार्थी सकलः फलेनैवेति वस्तुताम् ।

प्रवृत्त्याक्षेपिसंकल्पसूतिसामर्थ्यगर्भतः ।
अद्वैतशिखरारोहे न प्रवृत्तिनिवृत्तयः ॥§ 2353

ता एव संसार इति तद्धेतुः कथमिष्यताम् ।
दर्पणे दृश्यते रूपमिति बालाभिमानतः ॥§ 2355

अनूद्य वेदनाकारे तदारोपनिवारणम् ।
तथा भावेषु भावत्वं ज्ञानाकारेषु बाह्यता ॥§ 2357

यथा तिमिरिणा दृष्टचन्द्रयोश्चन्द्रतासती ।
निम्नाद्य विरहाद् बाह्येनैकत्वं दर्पणेऽस्ति न ॥§ 2359

नान्तःप्रविष्टनिर्भासात् पृथक्त्वं प्रतिघातिना ।
भावैराकारसंज्ञैर्वा लक्ष्यते बोधरूपता ॥§ 2361

सामान्यं ज्ञानसंख्यातमत एवं पृथग्वचः ।
लोके रुढं पृथगिव ज्ञानमादर्शसन्निभम् ॥§ 2363

आकाराः प्रतिबिम्बाभा उभयोः कल्पितं न सत् ।
बोधस्य नैकता बाह्यैः स्वरूपविरहाप्तितः ॥§ 2365

नान्यत्वमग्रहप्राप्तेर्न सत्ता चाप्रकाशिनः ।
राजक्रमेण चादर्शे एकानेकत्ववर्जितम् ॥§ 2367

इति युक्तं न वा भावा युज्यन्ते दर्पणोपमाः ।
निराभासे स्थितो योगीत्याभासः कल्पना मता ॥§ 2369

एकापोहेन यत्तस्यामीषदाभासते बहिः ।
समन्तभासादाभासः प्रपञ्चो वा कदम्बवत् ॥§ 2371

विचित्रकल्पनारुढो हेयश्चित्रेऽपि चेतसि ॥§ 2372

शेषं समानम् । अथवा,

बाह्यग्राह्यस्य हानेऽपि ग्रहणस्थितिवारणम् ।
तथतारक्षणे स्थित्वा चित्तमात्रव्यतिक्रमः ॥§ 2374

यदाह,

॥ इति महापण्डितज्ञानश्रीमित्रविरचितायां साकारसिद्धौ
चित्राद्वैतपरिच्छेदश्चतुर्थः ॥

466

## ११.५ पञ्चमः परिच्छेदः

ननु स्वसंवेदनविलासः सर्वोऽयं पूर्वो विस्तरः, स्वसंवेदनं च नाम नास्त्येवैतत्, युक्त्यागमनिगृहीतत्वात् ।

तदभावे कुतश्चित्रा चित्राद्वैतव्यवस्थितिः ।
न वा समन्तभद्रत्वमालीक्यापरिहारतः ॥§ 3015

अत्र प्रश्नः,

105b/jnams * विदेव किं नास्ति किमस्तु न स्वयं प्रमेयहत्याथ कथं प्रवेदनम् ।
हतिः स्ववित्तौ परवेदनेऽपि वा समस्तमेतन्न समस्ति निर्णये ॥§ 3017

तथा हि,

संवित्तिर्मम नेति न प्रथयितुं शक्यं विभिन्नैर्मृदो नापीयं परतः क्वचिन्न च परिस्फूर्ताविपीदं न सत् ।
न स्फूर्तौ स्वयमेव सत्यमिति चेदन्येन वित्तौ कुतः सत्त्वं नोभयथापि चेति गदितुं चैतत्स्वतोऽसांप्रतम् ॥§ 3019

अयमर्थः, § 3020

संवित्तिरेव नास्तीति ब्रूयान्निश्चेतनोऽपि किम् ।
न वक्ता चेन्न च श्रोता स्वनिर्भासस्तथाप्ययम् ॥§ 3022

परतस्तु वेदनमिति निरस्तमन्यत्रेत्यास्तां तावत् । अथ न सर्वथा वार्यते स्वसंवित्तिः, किं तु सांवृतीत्युच्यते, तर्हि सर्वथाप्रतिक्षेपाभावे बाधकाधीनमस्याः सांवृतत्वम् । बाधा च प्रमेयाद् भेदेनानुभवाद् वा । प्रमेयबाधयैव न तस्याः स्थितिरिति । तत्र, § 3023

भेदेनानुभवे भेदात् स्वानुभूतिः कथं भवेत् ।
प्रमेयबाधा तु पुनः शक्रेणापि न शक्यते ॥§ 3025

467

५ *] Misnumbered as १०५a in **thakur**८७.

उपलभ्यते । मूलेऽसत्कल्प इत्यभूतपरिकल्प उक्तो भूतार्थो द्वयविवेकः । § 3218

तन्निमित्ते यथा लोको ह्यभ्रान्तः कामतश्चरेत् ।
परावृत्तावपर्यस्तः कामचारी तथा यतिः ॥§ 3220

यथा तन्निमित्ते काष्ठादावभ्रान्तो लोकः कामतश्चरति स्वतन्त्रः, तथाश्रयपरावृत्तावविपर्यस्त आर्यः कामचारी भवति स्वतन्त्रः । अत्र च काष्ठादियन्त्रमात्रमेतद् भ्रान्तज्ञानाकारो वा न हस्ती न वा सुवर्णमिति निश्चयादिति मन्तव्यम् । § 3221

तदाकृतिश्च तत्रास्ति तद्भावश्च न विद्यते ।
तस्मादस्तित्वनास्तित्वं मायादिषु विधीयते ॥§ 3223

एष श्लोको गतार्थः । § 3224

न भावस्तत्र चाभावो नाभावोभाव एव च ।
भावाभावाविशेषश्च मायादिषु विधीयते ॥§ 3226

न भावस्तत्र चाभावो यस्तदाकृतिभावो नासौ न भावः । नाभावो भाव एव च, यो हस्त्याद्यभावो नासौ नाभावः । तयोश्च भावाभावयोरविशेषो
112b/jnams मायादिषु विधीयते । य एव तत्र तदाकृतेर्भावः, स एव हस्त्याद्यभावः । य एव हस्त्याद्यभावः, स एव तदाकृतिभावः । § 3227

तथाद्वयाभता चास्ति तद्भावश्च न विद्यते ।
तस्मादस्तित्वनास्तित्वं रूपादिषु विधीयते ॥§ 3229

तथात्राभूतपरिकल्पेऽद्वयाभता चास्ति द्वयभावश्च नास्ति । तस्मादस्तित्वनास्तित्वं रूपादिषु विधीयते, अभूतपरिकल्पस्वभावेषु । अत्र च द्वयमिवाभातीति द्वयाभस्तस्य भावोऽन्तर्बहीरूपप्रतिभासी स्वभावः । § 3230
486

न भावस्तत्र चाभावो नाभावो भाव एव च ।
भावाभावाविशेषश्च रूपादिषु विधीयते ॥§ 3232

न भावस्तत्र चाभावो या द्वयाभासता । नाभावोभाव एव च या तद्द्वयभावनास्तिता, भावाभावाविशेषश्च रूपादिषु विधीयते । य एव हि द्वयाभासतया भावः स एव द्वयस्याभाव इति । § 3233

समारोपापवादान्तप्रतिषेधार्थमिष्यते ।
हीनयानेन यानस्य प्रतिषेधार्थमेव च ॥§ 3235

किमर्थं पुनरिह भावाभावयोरैकान्तिकत्वमविशेषश्चेष्यते, यथाक्रमम् ? समारोपापवादान्तप्रतिषेधार्थमिष्यते, हीनयानगमनप्रतिषेधार्थं च । अभाव-

प्रज्ञापारमितायां हि त्रीन् समाश्रित्य देशना ।
कल्पितं परतन्त्रं च परिनिष्पन्नमेव च ॥[§ 3435]

नास्तीत्यादिपदैः सर्वैः कल्पितं विनिवार्यते ।
मायोपमादिदृष्टान्तैः परतन्त्रस्य देशना ॥[§ 3437]

चतुर्धा व्यवदानेन परिनिष्पन्नकीर्तनम् ।
प्रज्ञापारमितायां हि नान्या बुद्धस्य देशना ॥[§ 3439]

इत्यक्षुण्णपारमितानयार्थानुगमात् । न चात्र परतन्त्रस्याप्याकारोऽसन् प्रकाशमात्रं तु सदित्युक्तम्, येन पारमितानयादियता भेद इति स्यात् । न च स्वाभिमतं स्फुटीकृत्य तदर्थोऽप्येवं द्रष्टव्य इत्यतिदेशः कृतः । नापि साध्ये विशेषप्रदर्शनमस्ति येन तथा उन्नीयेत ।

प्रज्ञापारमिताज्ञानमद्वयं सा तथागतः ।[§ 3440]

साध्येति ग्राह्यग्राहकमात्रशून्यतायाः प्रतिपादनात् । अन्यथा निराभासत्वमेव वाच्यं स्यात् । न च स एवाकारो ग्राह्यं ग्राहकं भवितुमर्हति तल्लक्षणायोगादिति कल्पितमेव तत्त्वं भिन्नं वा ग्राह्यादि । संभोगकायश्च लौकिक औपचारिको वेति विशेषेण निर्देश्येत, भगवत्याः पिण्डार्थस्यारब्धत्वात्, अन्यत्र चैवमनुक्तेः । वार्तिकं चादर्श एषां किमतः परम् ? तत् किमात्मनोऽशुचिना लेपनं परस्य ? स्वयमेव वा,

क्वचिद् गुणा एव न रूपमुत्तमं क्वचिच्च रूपं न गुणा विशेषतः ।
अमी त्वसाधारणयोगसंपदो गुणाश्च रूपं च भवन्तमाश्रिताः 506
॥[§ 3442]

इति विशेषाभिव्यक्तेरित्यलं बहुना । न चास्माकं यावत्संभवं ग्रन्थकाराशयसमर्थनयत्नः । एकवंशसंमतास्त्वेत इति । तथा हि, [§ 3443]

आर्यासङ्गमनङ्गजिन्नयवहो यद् भूपतीशोऽन्वशाद् आचार्यो
वसुबन्धुरुद्धुरमतिस्तस्याज्ञयादिद्युतत् ।
दिग्नागोऽथ कुमारनाथविहितासामान्यसाहायकस्तस्मिन्
वार्तिकभाष्यकारकृतिनोरद्यानवद्या स्थितिः ॥[§ 3445]

आर्यनागार्जुनपादानां तु भिन्नवंशत्वेऽपि साधारणैव साध्यतत्त्वस्थितिरिति दर्शितम्, अबाध्यस्वसंवेदनस्वीकारात् । तदेवम्, [§ 3446]

केचिद् बुद्धमलीकरूपवपुषं बुद्ध्या विहीनं विदुः
संविद्रूपमरूपमम्बरनिभं न भ्रान्तमन्ये पुनः ।
संविद्रूपमलीकसुन्दरतनुं भ्रान्त्या विमुक्तं परे केचित्
त्वेनमलीकताविरहितं यद्भाति तद् गृह्यताम् ॥[§ 3448]

...umbered न चैवमेककालत्वे कार्यभेदेऽप्यपोह्यते ।
अभेदभासिनो दीपपीतस्येव प्रकाशिनः ॥ २० ॥ § 3544

...umbered किं च बाधात्र नात्रेति पृथग्भासे द्वयोर्भवेत् ।
बाधायोग्यस्वभावस्य विभागेनोपलम्भतः ॥ २१ ॥ § 3546

...umbered न चानाकारभागस्य पृथग्भासोऽस्ति नीलतः ।
देशव्याप्त्यवसायस्तु बाधकेऽस्यैव साधकः ॥ २२ ॥ § 3548

...umbered सिद्धोऽपि तत्र हेतुश्चेन्न समर्थः प्रकल्प्यते ।
नूनं न साध्यसंबन्धो नाकारेऽपि ततः क्षमः ॥ २३ ॥ § 3550

...umbered भासनं भास इति च धर्मो नीलेऽस्ति भासिनि ।
तस्य स्वभावभूतत्वाद् बाधाबाधौ समौ द्वयोः ॥ २४ ॥ § 3552

...umbered न नीलस्य प्रकाशश्चेत् साहसं किमतः परम् ।
परतोऽपि भवन्नस्य प्रकाशोऽशक्यवारणः ॥ २५ ॥ § 3554

...umbered नान्यतोऽपि प्रकाशोऽस्य प्रकाशोऽस्यान्य एव चेत् ।
न तन्नीलं प्रकाशेत प्रकाशेऽन्यस्य किं फलम् ॥ २६ ॥ § 3556

...umbered यतः कुतोऽपि वा तस्मात् प्रकाशोऽस्यानपह्नवः ।
दीपेन भासमानस्य घटादेः किं न भासनम् ॥ २७ ॥ § 3558

518 ...umbered तस्य बाधोक्तिरफला धर्म्यबाधावकाशतः ।
यतस्तद्भासनं तत्तु भासमानं न दृश्यते ॥ २८ ॥ § 3560

...umbered यदि प्रकाशो नीलादिः किं प्रकाशान्तरेण वः ।
अथाप्रकाशो नीलादिः किं प्रकाशान्तरेण वः ॥ २९ ॥ § 3562

...umbered ध्वस्तोऽन्येन प्रकाशो हि प्रसिद्धमपरं न च ।
123b/jnams कस्याबाधः कुतो हेतोः सर्वस्याश्रयसंशयात् ॥ ३० ॥ § 3564

...umbered अथास्ति स्फुरणं तावन्नीलधर्मस्तु तन्मतम् ।
तस्याबाधनतो भेदसिद्धौ सिद्धं समीहितम् ॥ ३१ ॥ § 3566

...umbered भासमानस्य नीलस्य तावद्धर्मेण भाषया ।

अवश्यभाव्यं तद्भेदप्रतिज्ञान्या पटुः सहा ॥ ३२ ॥[§ 3568]

...umbered कुतश्च भासमात्रं तदबाध्यं स्वविदा यदि ।
स्ववित्तावपि नीलादि किं न बाधाभिधावति ॥ ३३ ॥[§ 3570]

...umbered स्वसंवित्तिर्न नीलस्य यदि किं न प्रकाशते ।
प्रकाश्यतां परेणेति निषिद्धमिदमीदृशम् ॥ ३४ ॥[§ 3572]

...umbered असत्त्वान्न परत्वं चेत् स्वं नेत्येव कुतोऽस्य वित् ।
अस्वभासनशक्तिश्च निमील्याक्षि निगद्यते ॥ ३५ ॥[§ 3574]

...umbered अथ कल्पिततादात्म्यादेतदन्योन्यसंशयः ।
भासः कल्पिततादात्म्याद्भासात् तादात्म्यकल्पनम् ॥ ३६ ॥[§ 3576]

...umbered कल्पितं क्वचिदर्थे च नोपयोगीति संमतम् ।
इयन्तं कालमधुना श्रद्धेयमिदमप्यभूत् ॥ ३७ ॥[§ 3578]

...umbered तेनान्यासंभवाद् भ्रान्तिवासनोपप्लवान्मनः ।
अलीकरूपैर्भातीति प्रक्रियामात्रपोषणम् ॥ ३८ ॥[§ 3580]

...umbered साध्यशून्यश्च दृष्टान्तः स्वप्नोऽलीकैरितीह च ।
स्वादिः सहार्थान्नान्यार्थाभासनं केन कस्यचित् ॥ ३९ ॥[§ 3582]

...umbered अविद्ययापि निर्भान्तः आकाराः सन्तु तत्कृताः । 519
प्रकाशास्तु प्रजायन्ते यथा दीपः स्वहेतुतः ॥ ४० ॥[§ 3584]

...umbered तथापि हेत्वपेक्षा चेत् स्वप्रकाशत्वबाधनी ।
भिन्नोऽप्यनुभवोऽन्यस्मादुदयन् किं स्ववेदनः ॥ ४१ ॥[§ 3586]

...umbered तत् क्वचित् स्वविदोऽभावान्नास्ति व्यवहतिर्भवेत् ।
भवेद् वाकारपुञ्जेऽपि समानन्यायसंभवात् ॥ ४२ ॥[§ 3588]

...umbered भासमानस्य च भवेत् स्वप्रकाशः परेण वा ।
नीलादाविति चिन्तेयं न त्वभासिन्यनाकृतौ ॥ ४३ ॥[§ 3590]

...umbered न च कार्यतया भासमात्रं हेतिभिराकृतेः ।
स्वसंभवेऽन्यव्यापारापेक्षं कार्यं हि कथ्यते ॥ ४४ ॥[§ 3592]

...umbered नीलधर्मः प्रकाशोऽस्मान्न भेद्यो भेदिनः पुनः ।
कल्पितस्य स एवात्मा भण्यते भासिनो न किम् ॥ ५७ ॥§ 3618

...umbered कल्पितं तस्य जात्यादे रूपं किं न तदेव तत् ।
प्रमाणेन तु तत्सत्यमसत्यं वेति चिन्त्यते ॥ ५८ ॥§ 3620

...umbered तेन भानेऽपि नीलादिरलीको वस्तुसन्मतः ।
अयोगाद् बाधकस्येति विभागः किं कृतो भवेत् ॥ ५९ ॥§ 3622

...umbered न वा तस्य प्रमासिद्धः शक्तियोगोऽपि संभवी ।
आकृतिं वाकृतेरेव सामर्थ्यस्योपलम्भतः ॥ ६० ॥§ 3624

...umbered विरुद्धधर्माध्यासाच्च न विना भेदसाधनम् ।
धर्मौ विरुद्धौ भिन्नाधिकरणौ यदि सिध्यतः ॥ ६१ ॥§ 3626

...umbered देशकालाकृतिकृतो भेदोऽधिकरणस्य च ।
न संभवी नीलधियोस्तत् क्व धर्मविरोधिवत् ॥ ६२ ॥§ 3628

...umbered देशकालप्रतीभासभेदाभावेऽपि भेदनम् ।
नीलोत्पलादाविव तद् भवतो यदि सिध्यति ॥ ६३ ॥§ 3630

...umbered अन्तः स्फुरत्सुखाद्येव स्वसंवेद्यं मनो यदि । 521
नीलाद्याकारविरहादनाकारं च संमतम् ॥ ६४ ॥§ 3632

...umbered प्रतिभासाद् यदि ज्ञानं सुखं सोऽस्ति सितेरपि ।
अभेदेन प्रकाशश्चेत् सुखस्यैवं सितेरपि ॥ ६५ ॥§ 3634

...umbered यथा भिन्नं सुखान्नीलं नीलाद् भिन्नं तथा सुखम् ।
यथा नाहं मतं नीलं तथा नाहं मतं सुखम् ॥ ६६ ॥§ 3636

...umbered अहं सुखीति व्यवहृन्नाहं नीलीति चेन्मतिः ।
व्यवहारभावाभावौ नार्थसाधनबाधनौ ॥ ६७ ॥§ 3638

...umbered साधारण्याभिमानेन न भवेदपि सा स्थितिः ।
तथापि क्वचिदस्त्येव गोमान् दण्डी दुकूलवान् ॥ ६८ ॥§ 3640

...umbered यथा नियतकालत्वं तथा नियतदेशता ।
बाधकावञ्चनात् तस्मान्निराकृतिगिरात्र किम् ॥ ८१ ॥[§ 3666]

...umbered अस्तु वा बाधकाभावः सत्ताश्वासस्तु किंकृतः ।
एकेतरत्वयोरेकस्थित्यसिद्धेरदेशतः ॥ ८२ ॥[§ 3668]

...umbered न चादर्शनमात्रेण बाधाभावोऽपि सिध्यति ।
एकबाधवियोगेऽपि स्याद् वा बाधान्तरोदयः ॥ ८३ ॥[§ 3670]

...umbered अनुमानादबाध्यत्वसाधने यदि साधनम् ।
कथञ्चिदाश्रयासिद्धिदूषणं नातिवर्तते ॥ ८४ ॥[§ 3672]

...umbered दुःखद्वेषादयोऽप्येवं स्वभावाः सर्वदेहिनाम् ।
हानं स्वतोऽप्यनिष्टेश्चेदसतोऽपीच्छया स्थितिः ॥ ८५ ॥[§ 3674]

...umbered यद् यथा भाव्यते चेतः तत् तथैव स्फुटीभवेत् ।
व्योमाकारमपि स्याच्चेन्न प्रयोजनहानितः ॥ ८६ ॥[§ 3676]

...umbered संसारदोषैरस्पृष्टं लक्षणव्यञ्जनोज्ज्वलम् ।
आत्मभावं विहाय त्वं विहायस्त्वं यदीच्छसि ॥ ८७ ॥[§ 3678]

...umbered यदि तावत् खवद् व्यापि तद्वदेवास्य दूषणम् । 523
ज्योत्स्नातडिन्मणिज्वालास्फुलिङ्गादितुलास्वपि ॥ ८८ ॥[§ 3680]

...umbered सांशेऽवयविवद् दोषो निरंशे परमाणुवत् ।
न चापरः प्रकारोऽस्ति मुधैवादेशघोषणम् ॥ ८९ ॥[§ 3682]

...umbered गुणास्तदेकनियतास्तदेकनियता रुचिः ।
तदेकनियतं मानं बाधेनैव समः परः ॥ ९० ॥[§ 3684]

...umbered पर एव जिनो येषां तैः स्वशास्तापि हारितः ।
ऋजुक्रमगृहीतो य आगमाल्लक्षणोज्ज्वलः ॥ ९१ ॥[§ 3686]

...umbered येन रूपेण यन्नैकं नानेकं तेन तन्न सत् ।
यथा शातमशातेन भासश्च सितिना तथा ॥ ९२ ॥[§ 3688]

...umbered न धर्मो धर्मिणो भेत्तुं शक्य इत्युक्तमेव हि ।
न च भिन्नस्य भानस्य न्यायेनानेन साधनम् ॥ ९३ ॥[§ 3690]

...umbered यदि नाम न नीलेन प्रकाशस्यास्ति वस्तुता ।
तथापि भिन्नभानस्य वस्तुत्वं केन सिध्यति ॥ ९४ ॥§ 3692

...umbered बन्ध्यासुतोऽग्निरूपेण नैकानेको न तेन सन् ।
ततस्तस्यापि वस्तुत्वं किमस्तु भवतो मितेः ॥ ९५ ॥§ 3694

...umbered न सन् बन्ध्यासुतः सिद्धः प्रकाशः सिद्ध एव सन् ।
असिद्धो भेद एवास्य साध्यते चेत् तदप्यसत् ॥ ९६ ॥§ 3696

...umbered तत्त्वतः सत्यरूपेण सिद्धिर्भेदस्य चेन्मता ।
सा न सिद्धा न हि व्यापिविरहो नास्त्यवस्तुनि ॥ ९७ ॥§ 3698

...umbered प्रतीतिमात्रं सिद्धिश्चेद् भिन्नोऽप्येवं न तात्त्विकः ।
व्यावहारिकभेदस्तु किं न पीतसितस्य ते ॥ ९८ ॥§ 3700

...umbered यदि प्रकाशसत्तां च बाधकावसरं हनन् ।
साधयेत् तावतैवास्तु भेदो मानमिदं वृथा ॥ ९९ ॥§ 3702

524 ...umbered तदशक्तावपि व्यर्थमेतत् शौटीर्यजृम्भितम् ।
परस्योपगमः संप्रत्यप्रमा कथमाश्रयः ॥ १०० ॥§ 3704

...umbered नीलभासोरभेदावभासिनोः प्रस्तुता च भित् ।
न चैवमन्वयः शक्यस्तथा साध्यमतः कथम् ॥ १०१ ॥§ 3706

...umbered येन नैकमनेकं यदिति सामान्यतोऽन्वये ।
पीतेन नैकानेकोऽस्तु नीलभासो न तेन सन् ॥ १०२ ॥§ 3708

...umbered अनुक्तोऽपीच्छया व्याप्तः साध्य आत्मार्थवन्मतः ।
विशेषेणान्वयस्तस्मात् सामान्ये सिद्धसाधनम् ॥ १०३ ॥§ 3710

...umbered यथा ज्ञातमज्ञातेन भिन्नेनैवातदात्मकम् ।
125a/jnams तज्ज्ञातिनैव पीतेननीलभासोऽस्तु तादृशः ॥ १०४ ॥§ 3712

...umbered नैकानेकप्रकाशश्च नीलेनेति यदोच्यते ।
कस्तदास्तु प्रकाशार्थो धर्ममात्रं यदीष्यते ॥ १०५ ॥§ 3714

...umbered धर्मिरूपादभिन्नस्य तस्य तेनैव सा स्थितिः ।

ऐक्यानैक्यं प्रकाशस्य नीलेनैवेत्यसिद्धता ॥ १०६ ॥[§ 3716]

...umbered तस्यापि नैक्यानैक्यं चेदनेकान्तोऽपि वाञ्छते ।
पिण्डेन नैकानेकं सद् वस्तुसद् गोत्वमस्तु किम् ॥ १०७ ॥[§ 3718]

...umbered कर्तृसाधनपक्षेऽपि दोष एव दुरुद्धरः ।
प्रकाशमानरूपं हि शून्यं तेनात्मना भवेत् ॥ १०८ ॥[§ 3720]

...umbered अर्थान्तरं प्रकाशाख्यं यदि सान्वयसंज्ञकम् ।
नीलादिभ्योऽतिरिक्तस्य न सत्तास्य फलं न च ॥ १०९ ॥[§ 3722]

...umbered निरन्वये च हेतूनामाश्रयासिद्धिरत्र ते ।
व्यावृत्तिमात्रसिद्धौ च प्रस्तुतेऽनुपयोगिता ॥ ११० ॥[§ 3724]

...umbered प्रत्यक्षप्रतिवेद्योऽयं प्रकाशो धर्मकारि चेत् ।
प्रत्यक्षगोचरो धर्मी नीलादन्यो न विद्यते ॥ १११ ॥[§ 3726]

...umbered परत्वमेव चेत् साध्यं तत् सिद्धं कथमर्थ्यते । 525
साध्यं तव किमप्यस्तु धर्मी कार्यस्त्विदन्तया ॥ ११२ ॥[§ 3728]

...umbered परिनिष्ठित एवार्थो वस्तुरूपो यदा मतः ।
व्यवच्छेदद्वये निष्ठानपेक्षायां फलं न वः ॥ ११३ ॥[§ 3730]

...umbered ननु प्रकाशः सामान्यं धर्मि किं भेदनिष्ठया ।
विशेषनिष्ठया साध्यविधूतेश्च न तच्छ्रमः ॥ ११४ ॥[§ 3732]

...umbered स निष्ठितविशेषोऽपि विवादपदमेष यः ।
धर्मी तदेका व्यावृत्तिरन्या साध्यं ध्वनाविव ॥ ११५ ॥[§ 3734]

...umbered युक्तो व्यावृत्तिमात्रेण साध्यसाधनसंस्थितिः ।
धर्मिरूपं तु भेदेन दृष्टमेवोपयुज्यते ॥ ११६ ॥[§ 3736]

...umbered सामान्यधर्मयोरेव व्याप्तिः शक्यप्रतीतिका ।
अयमेवमितीत्थं तु धर्मी सर्वत्र भेदभाक् ॥ ११७ ॥[§ 3738]

---

८ ते] ०रप्रमे इति मातृकायाम् ।

...umbered सामान्याश्रयणं यत्र तत्रावश्यमपेक्षते ।
विशेषदर्शनं सिद्धिः सामान्यस्यैव नान्यथा ॥ ११८ ॥§ 3740

...umbered न विशेषं विना क्वापि सामान्यस्य व्यवस्थितिः ।
नो चेदबन्ध्यातनयव्यावृत्तेश्च समानता ॥ ११९ ॥§ 3742

...umbered भेदः साध्यस्य दृष्टान्ते हेतोः पक्षसपक्षयोः ।
सामान्यस्याप्यवश्योपदेश्यो धर्मी त्विदन्तया ॥ १२० ॥§ 3744

...umbered व्यक्तिभेदाः क्षणित्वादेरप्यमी एव संमताः ।
प्रसिद्धव्यक्तिभेदश्च शब्दो धर्मी तथापरः ॥ १२१ ॥§ 3746

...umbered अप्रकाशपरावृत्तिस्तद्वदेवात्र दर्श्यताम् ।
इदन्तया यदि पुरो दर्श्येताकार एव सः ॥ १२२ ॥§ 3748

...umbered ततः प्रकाशः सामान्यं नीलाद्येवेतिवादिना ।
स्वीकृते विविदिष्यन्ते सत्त्वात्मादिनि दूषके ॥ १२३ ॥§ 3750

526 ...umbered सिद्धे धर्मिणि सन्दिग्धो धर्मः साधनमर्हति ।
धर्मिरूपविशेषस्य निष्ठायां तु हतो हतः ॥ १२४ ॥§ 3752

...umbered क्षणिकत्वादिरप्येवं यदि धर्मिणि निष्ठिते ।
हन्येत साधयेत् कस्तं संशयार्थस्य साधनम् ॥ १२५ ॥§ 3754

...umbered येन रूपेण यन्नैकं नानेकं तेन तन्न सत् ।
यथा ज्ञातमज्ञातेन प्रकाशेनासितं तथा ॥ १२६ ॥§ 3756

...umbered विद्युदुद्योतसंकाशः प्रकाशः कस्यचित् क्वचित् ।
तमपेक्ष्य स्थिरो बाह्यः प्रकाशेऽलीकता ततः ॥ १२७ ॥§ 3758

...umbered अलीकनीलजनने यथा शक्तिर्मता धियः ।
अलीकबोधजनने तथा शक्तिर्न किं बहिः ॥ १२८ ॥§ 3760

...umbered नैकं त्वयाप्यनिष्टेरित्येतदुक्तं न लभ्यते ।
ईदृक्साधनमज्ञात्वा ममानिष्टिर्यतोऽभवत् ॥ १२९ ॥§ 3762

125b/jnams ...umbered प्रकाशः केवलोनापि क्वचित् केनचिदीक्षितः ।

ततोऽनुमानप्रत्याशा प्रत्याशैव हि केवला ॥ १३० ॥§ 3764

...umbered तेनैकानेकहानिश्चेत् स्वेनैकानेकसंभवः ।
ततः स्वेन स्थितिः साध्या हेत्वसिद्धिस्तथापि वः ॥ १३१ ॥§ 3766

...umbered विपर्ययविवक्षा चेत् यद् यद् येनात्मना हि सत् ।
तत्तत् तेनैकानेकं वा भासश्च स्वेन सन्निति ॥ १३२ ॥§ 3768

...umbered नाद्ये दृष्टान्तसद्भावो भास एव हि संमतः ।
न पक्षे चोपसंहारो विवादात् प्रकृतं न च ॥ १३३ ॥§ 3770

...umbered यो भ्रमः सर्व एवासौ द्विचन्द्रप्रतिभासवत् ।
सत्यसङ्गी भ्रमश्चायं द्वैताभास इतीतरे ॥ १३४ ॥§ 3772

...umbered खण्डद्वयाकारतया जन्म वा द्वैतभासनम् ।
ग्राह्यग्राहकरूपावसायौ वेति विवक्षितम् ॥ १३५ ॥§ 3774

...umbered अतस्मिन्नतदाकारा वेद्ये सति मतिर्भ्रमः । 527
सर्वथा वेद्यहानौ तु न भ्रमो नाम तत्त्वतः ॥ १३६ ॥§ 3776

...umbered यत् किञ्चिदतथाभूतं तथा भावेन कल्प्यते ।
कीदृक् तस्यापराधोऽस्तु कल्पकस्य तु युज्यते ॥ १३७ ॥§ 3778

...umbered कल्पकोऽपि न कश्चिच्चेद्भ्रमो नाम न कश्चन ।
तन्नासिद्धतया हेतुर्व्यवहारादथ भ्रमः ॥ १३८ ॥§ 3780

...umbered व्यवहारादवितथं बहिरेव कथं भ्रमः ।
अबहिर्व्यवहारे तु यदारोपस्तदा भ्रमः ॥ १३९ ॥§ 3782

...umbered आरोपातिक्रमे यस्मात् तत्त्व एव व्यवस्थितिः ।
बाधनाद् वितथत्वेन भ्रमस्तदपि किं भ्रमः ॥ १४० ॥§ 3784

...umbered भासनेऽलीकमित्यस्तु भ्रमत्वं वा कथं भवेत् ।
अतस्मिंस्तद्ग्रहाभावादनलीकमतेरिव ॥ १४१ ॥§ 3786

...umbered द्विचन्द्रप्रतिभासेऽपि भ्रमत्वं यच्च विश्रुतम् ।

द्विचन्द्रग्राहिचित्तस्य तन्न चन्द्रद्वयस्य तु ॥ १४२ ॥[§ 3788]

...umbered ग्राह्यग्राहकभावेन कल्पितेऽशद्वये धियः ।
ग्राहकांशे प्रमाणत्वं ग्राह्यांशे भ्रमता कथम् ॥ १४३ ॥[§ 3790]

...umbered वेद्यत्वे वेदकत्वे च व्यतीते भासमात्रकम् ।
बोधकग्रस्तमप्येतदसत्यं स्यान्न तु भ्रमः ॥ १४४ ॥[§ 3792]

...umbered वेदकाभिमतत्वेन भ्रमत्वं व्याप्तमिष्यते ।
तद्विरोधिन्यवेदित्वे भ्रमत्वं दूरतो हतम् ॥ १४५ ॥[§ 3794]

...umbered अन्यथाध्यवसाये तु भ्रमत्वे निर्विकल्पकम् ।
न भ्रमस्तेन तेनैव सत्यसङ्गित्वमस्तु च ॥ १४६ ॥[§ 3796]

...umbered यद् यत्रावस्थितेऽपैति तत् तद्भिन्नं पटाम्बुवत् ।
प्रकाशेऽवस्थितेऽपैति नीलादीति परे विदुः ॥ १४७ ॥[§ 3798]

528 ...umbered यद् यत्रावस्थितेऽपैति तत् तद्भिन्नं पटाम्बुवत् ।
गोत्वे चावस्थितेऽपैति चित्रादीत्यपि गीयताम् ॥ १४८ ॥[§ 3800]

...umbered अथ गोत्वमगोऽपोहस्तत् तद्धर्मोऽन्वयी कथम् ।
भासोऽपि भासिनां धर्मो नीलादीनां किमन्वयी ॥ १४९
॥[§ 3802]

॥ इति साकारसंग्रहे निराकारसाधकप्रमाणाभावनिर्णयः प्रथमः ॥
529

## १२.२ द्वितीयः परिच्छेदः

...1 नाप्यागमाद् गमयितुं शक्यं चित्तमनाकृति ।
न प्रत्यक्षप्रतिक्षिप्ते प्रमाणान्तरसंगतिः ॥ १ ॥[§ 3805]

...umbered न च प्रवचनेऽप्यस्य बोधकं मुख्यमक्षरम् ।
लोकः स्वाभिनिवेशं तु तत्रैव प्रतिबिम्बयेत् ॥ २ ॥[§ 3807]

...umbered वासनालुठितं चित्तमर्थाभासमिति श्रुतौ ।
लुठतिः श्लेषणार्थोऽयं नोपघातार्थलोठितः ॥ ३ ॥[§ 3809]

...umbered टीका त्वात्मग्रहाभावान्मुनेः स्वपरहानितः ।
न भूमेति वदन्त्याह देहमात्मग्रहं स्फुटम् ॥ ८८ ॥§ 3979

...umbered स्वार्थः परार्थः परमार्थकायता तदाश्रिता संवृतिकायता च ।
फलं विसंयोगविपाकभावादित्युत्तरेतन्त्रवरेऽथ कोऽर्थः ॥ ८९ ॥§ 3981

...umbered स्वार्थः स्वाभाविकोऽन्यार्थः संभोगो मत एव नः ।
प्रस्तावेऽत्र तयोः किं तु परमार्थत्वसंविधिः ॥ ९० ॥§ 3983

...umbered पारम्पर्येण साक्षाद् वा सांवृतस्तौ समाश्रितः ।
निर्माणकायः ख्यातं च निर्माणं सांवृतं फलम् ॥ ९१ ॥§ 3985

...umbered वदंस्तथागतगुणान्निर्माणं हि त्यजेत् कथम् ।
पारमार्थिकमित्येवं वृत्तौ कायावनूद्य तौ ॥ ९२ ॥§ 3987

...umbered आत्मसंपत्त्यधिष्ठाने विधिश्च न विरुध्यते ।
आत्मसंपत् द्विधा रूपनिष्पत्त्याभ्युदयेन च ॥ ९३ ॥§ 3989

537 ...umbered आद्यायामादिमाधिष्ठा द्वितीयस्य द्वितीयके ।
अचिन्त्यलोकातीतादिख्यातानेकविशेषणे ॥ ९४ ॥§ 3991

...umbered अथवात्मनि संभोगे संपत्तौ च तयोर्बलम् ।
रत्नविग्रहवज्ज्ञेयः कायः स्वाभाविकः शुभः ॥ ९५ ॥§ 3993

...umbered अकृत्रिमत्त्वात्प्रकृतेर्गुणरत्नाश्रयत्वतः ।
महाधर्माधिराजत्वात् संभोगश्चक्रवर्तिवत् ॥ ९६ ॥§ 3995

...umbered प्रतिबिम्बस्वभावत्वान्निर्माणं हेमबिम्बवत् ।
एवं वक्तरि नाथे तु स्वपक्षरसिकैः कृतः ॥ ९७ ॥§ 3997

...umbered संभोगः सांवृतो हित्वा निर्माणं धिक् स्वतन्त्रताम् ।
महाकरुणया कृत्स्नं लोकमालोक्य लोकवित् ॥ ९८ ॥§ 3999

४ कोऽर्थः ] उ. त. ३. १ १९ त्] उ. त. १. १५१. २
१७ तः ] ०त्वात् सत्प्र० त्वाकरे त्व०

...umbered धर्मकायादविचलन्निर्माणैश्चित्ररूपिभिः ।
इत्यादिना प्रबन्धेन यच्चात्रैव प्रदर्शनम् ॥ ९९ ॥[§ 4001]

...umbered उक्तं निर्वाणपर्यन्तजातकादेः पुनश्च यः ।
सर्वत्र देवभवने ब्राह्म्यादविचलन् पदात् ॥ १०० ॥[§ 4003]

...umbered प्रतिभासं यथा ब्रह्मा दर्शयेदप्रयत्नतः ।
तद्वन्मुनिरनाभोगान्निर्माणैर्लोकधातुषु ॥ १०१ ॥[§ 4005]

...umbered धर्मकायादविचलन् भव्यानामेति दर्शनम् ।
इत्यादि विस्तरस्तत्र धर्मकायात् पृथग् गिरा ॥ १०२ ॥[§ 4007]

...umbered संभोगात्मा न चेत् कोऽन्यः कार्यभारकरो मुनिः ॥ १०३
॥[§ 4008]

...umbered क्वचिद् धर्म्यं चक्रं बहुमुखशतैर्दर्शयति स क्वचिज्जन्मान्तर्धि
क्वचिदपि च चित्राञ्जनविधिम् ।
क्वचित् कृत्स्नां बोधि क्वचिदपि सनिर्माणमसकृन्न च स्थानात्
तस्माद्विचलति स सर्वं च कुरुते ॥ १०४ ॥[§ 4010]

...umbered इत्याह सूत्रालङ्कारेऽप्यत्र स्थानमनाश्रवः ।
धातुर्भाष्योदितो धर्मकायाचलनमेव तत् ॥ १०५ ॥[§ 4012]

...umbered तथाप्यलीक एवात्मा चाकारश्च भ्रमो मतः । 538
कार्यभारस्तदन्यस्मादिति लज्जैव लज्जिता ॥ १०६ ॥[§ 4014]

...umbered अस्तु चालीकभावेन भ्रमः स्थूले निरर्थकः । 128a/jnams
अवश्यहेयस्वाकारभारः स्यादिष्यते यदि ॥ १०७ ॥[§ 4016]

...umbered निरभ्रगगनाकारज्ञानस्यैवावशेषणात् ।
त्रिकायसिद्धिमुद्धूय परमेवेदमुद्गतम् ॥ १०८ ॥[§ 4018]

...umbered संभोगभङ्गे तद्धर्मो धर्मकायो न विद्यते ।
तत्कार्यं न च निर्माणं साध्वी बौद्धकृतान्तता ॥ १०९ ॥[§ 4020]

...umbered नन्वस्तमेतु संभोगो धर्मकायोऽस्त्वनाकृतिः ।

१ रूपिभिः ] तत्रैव २. ५३
७ म् ] तत्रैव ४. ५३. ४
१६ मः ] पृष्ठमिदं मातृकायां दुष्पठम् ।

तत एव च निर्माणं संभोगोऽपि तदाश्रितः ॥ ११० ॥§ 4022

...umbered भ्रमत्वादेव संभोगं हित्वानङ्गदशाश्रयः ।
विशुद्धेः स हि पर्यन्तस्तत्त्रयी सङ्गतिर्न किम् ॥ १११ ॥§ 4024

...umbered युवराजनयेनैतद् विरोधीत्युपपादितम् ।
तथापि यदि चर्चायां कौतुकं किञ्चिदुच्यते ॥ ११२ ॥§ 4026

...umbered अनाकारप्रकाशश्चेद् धर्मकायोऽभिधीयते ।
कस्तर्हि बुद्धसंभोगो न प्रहेयतयोचितः ॥ ११३ ॥§ 4028

...umbered कार्यार्थं ध्रियमाणोऽपि भ्रमत्वात् सुगतः कथम् ।
यदि कार्योपयोगी च मृषालीकत्वपोषणम् ॥ ११४ ॥§ 4030

...umbered तथा च सति न भ्रान्तिरभ्रान्तेस्त्यजनं न च ।
ततोऽनभ्रवतः साम्यसिद्धिसिद्धान्तनिर्धुतिः ॥ ११५ ॥§ 4032

...umbered तदस्यावश्यहेयस्य हेतुर्नारम्भमर्हति ।
ततोऽपि नासौ सुगतो धर्म एव जिनो यदि ॥ ११६ ॥§ 4034

...umbered धर्मकायो जिनस्येति व्यवहारो न सिध्यति ।
व्यावृत्तिभेदद्वारेणाप्येकस्यैवाभिधानतः ॥ ११७ ॥§ 4036

539 ...umbered जिनादिनामभेदेन कायाः स्युः शतमन्यथा ।
न च बुद्धो जिनस्येति व्यवहारोऽस्ति कुत्रचित् ॥ ११८ ॥§ 4038

...umbered धर्मिणो धर्मवाची तु भिदेव व्यवहारभाक् ।
धात्र्यास्तरोर्वा तरुता न तु धात्री तरोरिति ॥ ११९ ॥§ 4040

...umbered धर्ममात्रे मते बुद्धे बुद्धो धर्मस्य युज्यते ।
बुद्धस्य धर्मकायस्तु धर्मस्तस्य गुणो यदि ॥ १२० ॥§ 4042

...umbered तथा सति निराकारः कायस्तुर्यसमश्च ते ।
गणनीया न वा हानात् संभोगेन तनुत्रयी ॥ १२१ ॥§ 4044

...umbered समः सूक्ष्मश्च संबद्धः कायः स्वाभाविको मतः ।

इति चोद्यं विरुध्येत संबद्धपदवर्णने ॥ १२२ ॥[§ 4046]

...umbered सांभोगिकेन कायेन संबद्ध इति भाष्यतः ।
संभोगे सति तद्धर्मस्तेन संबन्धमर्हति ॥ १२३ ॥[§ 4048]

...umbered तदभावे न तादात्म्यं भावेऽप्यत्यन्तभेदतः ।
संभोगबुद्धताहेतुरिति तत्रैव कीर्तनात् ॥ १२४ ॥[§ 4050]

...umbered कार्यकारणभावश्चेत् कार्यं नावस्तु कस्यचित् ।
अवस्तुधर्मतामात्रं कथं हेतुरपीति चेत् ॥ १२५ ॥[§ 4052]

...umbered न मध्यान्तनये भाष्ये तदालम्बनतोद्गता ।
तद्धेतुतोक्तो धर्माणां टीकैवं तत्र तत्र च ॥ १२६ ॥[§ 4054]

...umbered तदंशो वा पृथक्कृत्य सन् पुरापि तथोच्यते ।
यथा विक्रम एवास्य राज्ञः सर्वार्थसाधकः ॥ १२७ ॥[§ 4056]

...umbered निराकारात् क्वचिज्जन्म कस्यचिन्नोक्तमात्मनि ।
सूत्रालंकारगदितं दूषणं तुल्यमत्र तु ॥ १२८ ॥[§ 4058]

...umbered प्रतीत्यभावप्रभवेऽप्ययं जनः समक्षवृत्ति श्रयतेऽन्यकारितम् ।
तमःप्रकारः कतमोऽयमीदृशो यतो विपश्यन् सदसन्निरीक्षते ॥ 540
१२९ ॥[§ 4060]

...umbered कर्ता भोक्ता च दृष्टेभ्यो भिन्नोऽहङ्कारगोचरः ।
निरञ्जनस्तदेकावशेषा मुक्तिश्च योगिनाम् ॥ १३० ॥[§ 4062]

...umbered इत्यात्मवाद एवायं न च नित्योऽक्रियादृशः ।
स्वभावनित्यता प्राप्ता धर्मकायतयास्य च ॥ १३१ ॥[§ 4064]

...umbered प्रकृत्याश्रंसनेनापि प्रबन्धेन च नित्यता । 128b/jnams
अत्र स्वाभाविके तस्यार्थस्य भाष्येण योजनात् ॥ १३२
॥[§ 4066]

...umbered कार्यभ्रमव्यवस्थायां यः स्वाभाविक एव सः ।
धर्मकाय इति प्रोक्तो व्यवदानव्यपेक्षया ॥ १३३ ॥[§ 4068]

---

८ ता ] ०तोद्भवतेति मातृकायाम् ।

...umbered इति व्याख्यापि तत्रैव किं तु धर्मेण धर्मिगीः ।
प्रस्तुतो धर्मकायस्तु धर्मधातुः सुनिर्मलः ॥ १४६ ॥[§ 4094]

...umbered तथाता भूतकोटिश्चानिमित्तं परमार्थता ।
धर्मधातुश्च पर्यायाः शून्यतायाः समासतः ॥ १४७ ॥[§ 4096]

...umbered इति मध्यान्तवीभागे धर्मधातुश्च वर्णितः ।
ज्ञेयः सपरिनिष्पन्नस्तत्त्वं धातुरनाश्रवः ॥ १४८ ॥[§ 4098]

...umbered शून्यता च द्वयेनोक्ता तत्र क्लेशदशावशात् ।
परतन्त्रगुणो ज्ञेयः संभोगस्य मलक्षये ॥ १४९ ॥[§ 4100]

...umbered सर्वाकारां विशुद्धिं ये धर्माः प्राप्ता अनाश्रवाः ।
स्वाभाविको मुनेः कायस्तेषां प्रकृतिलक्षणः ॥ १५० ॥[§ 4102]

...umbered अत्रापि चाभिसमयालङ्कारे न विरुध्यते ।
प्रकृतिः कारणं यस्मात् तत्त्वं च प्रतिपादितम् ॥ १५१ ॥[§ 4104]

...umbered यद् वा स्वभावः प्रतिपद्धर्माणां शून्यतैव सा ।
सर्वेषां च मता बुद्धप्रस्तावात्तु विशुद्धवाक् ॥ १५२ ॥[§ 4106]

...umbered न शुद्धिसंगृहीतोऽपि संभोगो गणितो गणे । 542
पृथक्कायो हि वाच्योऽसौ धर्मस्तस्य कथं तदा ॥ १५३ ॥[§ 4108]

...umbered मुख्यत्वान्न तु तस्यैव शेषः परिकरोऽस्य हि ।
एकज्ञानात्मकत्वेन तद्ग्रहेणैव गृह्यते ॥ १५४ ॥[§ 4110]

...umbered भोगः प्रतिष्ठाकारौ च ततो भिन्नौ न यद्यपि ।
अन्यवद्व्यवहारस्तु सांवृतः पुरुषाद्भिदा ॥ १५५ ॥[§ 4112]

इति धर्मकायस्वरूपचिन्तापर्यन्तप्रवचनमार्यासङ्गयुवराजोक्तिनिर्णयो द्वितीयः ॥

543

---

४ तः] म. वि. १. १५

...umbered तन्निराकारमेवोक्तमिति चेन्निश्चयो हतः । 544
किमन्यचिन्तयास्माकं प्रकृतस्य प्रसाधनात् ॥ १२ ॥[§ 4137]

...umbered क्वापि व्यवस्था कथमप्यागमे क्रियतां जिनैः ।
आद्याचार्येण वा सर्वमिदानीं प्रस्तुतं न तत् ॥ १३ ॥[§ 4139]

...umbered उपेक्षाकारसद्भावान्नारूप्येऽप्याकृतिक्षतिः ।
धियो विवर्तो ह्याकारः किंचिद्रूपस्य वा स्थितेः ॥ १४ ॥[§ 4141]

...umbered धीजातेर्व्यक्तिराकारो यदि नाकनिभा न किम् ।
किं वाधुना व्यवच्छेद्यं न किञ्चिद् बुद्धिसंभवे ॥ १५ ॥[§ 4143]

...umbered नीलादौ तु तदाकारादन्या बुद्धिर्निषिध्यते ।
स्वप्नेऽप्यदर्शनाद् धीस्तु तथा काचित् परान्यथा ॥ १६ ॥[§ 4145]

...umbered यद् यथा भासते ज्ञानं तत्तथैव व्यवस्थितम् ।
तत्तद्रूपाङ्गमिच्छा चेत् पात्रमस्या निवेदितम् ॥ १७ ॥[§ 4147]

...umbered मोहारूपविरागेणारूप्यधातुः शमाशया ।
तस्मान्नीलादिरात्मैव बुद्धीनां द्वयमेव न ॥ १८ ॥[§ 4149]

...umbered प्रसज्यपर्युदासाभ्यां सर्वाभावस्थितिर्द्विधा ।
पर्युदासो द्वयस्यात्र धर्मिरूपं स्वलक्षणम् ॥ १९ ॥[§ 4151]

...umbered तस्य वस्तुतया तावत् स्ववित्तिर्न विरुध्यते ।
धर्मिप्रत्यक्षमेवान्याभावेऽपि विहिता मितिः ॥ २० ॥[§ 4153]

...umbered भूतले कलसाभावो भूतलाध्यक्षसाधनः ।
संभोगे च द्वयाभावः संभोगाध्यक्षसाधनः ॥ २१ ॥[§ 4155]

...umbered आर्योऽन्यस्तदपेक्ष्येदमद्वयाय नमोऽस्तु ते ।
न रक्तो हरिन्माञ्जिष्ठ इत्यादिकमवर्णयत् ॥ २२ ॥[§ 4157]

...umbered प्रत्यात्मवेद्यमित्येवं स्वविद्य स्वगिरोदिता ।
तत्पर्युदस्तेऽपि समं कल्पेऽप्यवसिताश्रयात् ॥ २३ ॥[§ 4159]

...umbered अवसेयस्य निष्ठापि संभोगेन स्फुटीकृता । 545

अतएव च साकारस्वीकारस्तैः प्रकाशितः ॥ २४ ॥[§ 4161]

...umbered धर्मो नोत्पद्यते कश्चिन्नापि कश्चिन्निरुध्यते ।
उत्पद्यन्ते निरुध्यन्ते प्रत्यया एव केवलाः ॥ २५ ॥[§ 4163]

...umbered इति चाङ्कुरबीजादिस्थाने बुद्धिनिवेशनात् ।
तदाभासः स्फुटो यच्च कल्पितक्षयकीर्तनम् ॥ २६ ॥[§ 4165]

129b/jnams ...umbered महाभूतादिविज्ञाने प्रोक्तं समवरुध्यते ।
तज्ज्ञाने विगमं याति ननु मिथ्या विकल्पितम् ॥ २७ ॥[§ 4167]

...umbered तत्रासत्त्वाधिमोक्षोऽर्थावरोधः श्रुतचिन्तयोः ।
तज्ज्ञान इति च ज्ञानरूपसाक्षात्कृतौ क्षयः ॥ २८ ॥[§ 4169]

...umbered आत्मग्रहनिवृत्त्यर्थं स्कन्धधात्वादिदेशना ।
सापि ध्वस्ता महाभागैश्चित्रमात्रव्यवस्थया ॥ २९ ॥[§ 4171]

...umbered इति श्लाघासमुद्धारान्निश्चयोऽत्र रुचेरपि ।
स्थितिद्वयमपेक्ष्यायं विशेषश्चेद् यथोदितम् ॥ ३० ॥[§ 4173]

...umbered चित्तमात्रमिदं सर्वमिति या देशना मुनेः ।
तत्त्रासपरिहारार्थं बालानां सा न तत्त्वतः ॥ ३१ ॥[§ 4175]

...umbered उच्छेदाभिनिविष्टानामिच्छां दत्त्वैष संग्रहः ।
त्रासहानेन नेत्यत्र च्छेदस्तु परमार्थतः ॥ ३२ ॥[§ 4177]

...umbered अन्यथा बालसंत्रासहानिस्तुल्या स्थितिद्वये ।
कोऽत्र भेदो यतः श्लाघा प्रक्षेपो वा तथाविधः ॥ ३३ ॥[§ 4179]

...umbered नापनेयमतः किञ्चिदित्यादिवचनस्य च ।
अन्वाख्यानात् स्वयमपि व्याख्येयं किमतः परम् ॥ ३४
॥[§ 4181]

...umbered भूतात्मना भूतमेव भूतं भूतात्मनैव च ।
द्रष्टव्यमिति वाक्यार्थो नेयतां गीयतेऽत्र किम् ॥ ३५ ॥[§ 4183]

546 ...umbered सर्वनास्तित्ववादे हि न भूतं किञ्चिदस्ति यत् ।

...umbered धर्मानुसारो यदिवर्णतस्ते प्रमाणशास्त्रैकपरायणः स्याः ।
श्रद्धानुसारे तु महाजनीयः सभाजनीयो युवराजराजः ॥ ६०
॥§ 4233

...umbered जिनोक्तिमात्रं वत पुद्गलेऽपि न सन्धिनिर्मोचनमोचनेन ।
नीतार्थलाभस्तदनादरे तु बुद्धे स्वयं वक्तरि को विशेषः ॥ ६१
॥§ 4235

अन्तरश्लोकाः ॥ § 4236

...umbered विनेयभेदाद् भित्त्वैकां गाम्भीर्यपरमार्थतः ।
विधिबाधामुखतया चतुर्धा स्थितिरुच्यते ॥ ६२ ॥§ 4238

...umbered अपवादपरा ह्येके समारोपपराः परे ।
तत्राद्यानधिकृत्योक्ता प्रथमा चरमा परान् ॥ ६३ ॥§ 4240

...umbered स्वयं निषेधनिरतेष्वभिसङ्गं निषिध्य ये ।
चिन्तास्तित्वविधानेन योगाचारनयस्थितिः ॥ ६४ ॥§ 4242

...umbered आरोपरक्तेषु पुनर्बाधद्वारेण मध्यमा ।
तद्भम्ना च निषेधोक्तिर्भूयसी निरुपाधिका ॥ ६५ ॥§ 4244

...umbered पङ्गुवद्गाढनुन्नाक्तिभित्तौ स्थास्यन्ति ते स्वयम् ।
साधर्म्यवैधर्म्यगिरोरैकार्थ्ये किं न भेदनम् ॥ ६६ ॥§ 4246

...umbered योगाचारान्न तत्त्वेन भिद्यते शुद्धमध्यमा । 549
तस्मादार्योऽपि चार्येशनयस्थ इति सुन्दरम् ॥ ६७ ॥§ 4248

...umbered विशिष्टयोग्यतादृष्टेस्तद्द्वारेणान्यकर्षणात् ।
उत्साहनाच्च सोल्लासव्याकृतिर्न विरोधिनी ॥ ६८ ॥§ 4250

...umbered तस्मादेषामपि नये यावदुक्तनिषेधनम् ।
कल्पितस्यैव तज्ज्ञेयं द्वितीयाचार्यनीतिवत् ॥ ६९ ॥§ 4252

...umbered कल्पितस्य निषेधोऽयमिति संग्रहदर्शनम् ।
सर्वो ज्ञेयतया रूढ आकारः कल्पितो मतौ ॥ ७० ॥§ 4254

...umbered गुणरूपविशेषेण स्वस्तुतिर्वा किमन्यथा ।
यद् वा वार्तिकमादर्शस्तन्मतस्य परेण किम् ॥ ८४ ॥[§ 4282]

...umbered तत्र वार्तिककारेण यत्नाद् बाह्येऽपि साकृतिम् ।
धियं प्रसाध्य तन्मात्रं शेषितं ग्राह्यविप्लवात् ॥ ८५ ॥[§ 4284]

...umbered आत्मा स तस्यानुभवः स च नान्यस्य कस्यचित् ।
प्रत्यक्षप्रतिवेद्यत्वमपि तस्य तदात्मता ॥ ८६ ॥[§ 4286]

...umbered तथा ब्रुवाण आर्येश इत्थं वार्तिककृद् वदन् ।
संमुखोऽप्यन्यथा कुर्वन्न संप्रत्ययगोचरः ॥ ८७ ॥[§ 4288]

...umbered यद्याकारं प्रवेश्यापि चित्ते चित्तमनाकृतिः ।
इष्टमालीक्यमाकारस्यान्तर्न्यासोऽस्य किंफलः ॥ ८८ ॥[§ 4290]

...umbered निराकारं मनः सिद्धं सर्वयोः स्वान्यवादिनोः ।
ज्ञानवद् बहिरारोपेऽप्याकृतेर्दूषणं समम् ॥ ८९ ॥[§ 4292]

...umbered ततः प्रयासः किमियान् प्रक्षाल्य त्याग एव वा ।
अयत्नसिद्धो वितथस्फुरणे वासनान्वयः ॥ ९० ॥[§ 4294]

...umbered ग्रहसाधुतयाकारं ग्राह्येऽङ्गीकार्यदूषिते । 551
साकारचित्तनिष्ठायां युक्तमाकारसाधनम् ॥ ९१ ॥[§ 4296]

...umbered ग्रहणे करणत्वेन प्रकाशैकोपलम्भतः ।
विप्रतीतिशताधारं प्रसाध्याकारवन्मनः ॥ ९२ ॥[§ 4298]

...umbered मानमेयफलन्यायं निर्बन्धेन विधाय च ।
अतृप्तेः पुनरन्तेऽपि तदर्थो हि महान् श्रमः ॥ ९३ ॥[§ 4300]

...umbered प्रत्युतालीकमाकारं मुधा साधयतः प्रति ।
प्रत्यासत्तिं ग्रहेऽनाद्यः स एव स्यान्निदर्शनम् ॥ ९४ ॥[§ 4302]

...umbered ततः स्वभावतोऽनात्मप्रकाशबलवन्मनः ।
सिद्धमित्थफलं ग्राह्यलक्षणक्षतिचिन्तनम् ॥ ९५ ॥[§ 4304]

---

६ ता] प्र. वा. २. ३२६

...umbered यथावसायं तु बहिः शब्दार्थ इति निश्चयः ।
अतद्रूपपरावृत्तवस्तुमात्रस्थितेरिति ॥ १०८ ॥§ 4330

...umbered यथाप्रतीति सत्त्वं चेत् नावसायोऽत्र सापि तु ।
भासनं सैव सत्तास्य बाह्ये शक्तेस्त्वपेक्षणम् ॥ १०९ ॥§ 4332

...umbered तस्माज्ज्ञानतयैवोक्त आकारोऽर्थ इति स्थितम् ।
व्याख्यातं भाष्यकारेण यच्च तत्र श्रमेण किम् ॥ ११० ॥§ 4334

...umbered साकारमेव चेतश्चेत् पर्यन्तेऽप्यधिकं न हि ।
संक्लेशव्यवदानं चेत्येकमस्तु न तु द्वयम् ॥ १११ ॥§ 4336

...umbered आकार एव संक्लेशो व्यवदानं तु तत्क्षयः ।
इत्यनाकारवादे स्यादुभयस्य व्यवस्थितिः ॥ ११२ ॥§ 4338

...umbered अतस्मिंस्तद्ग्रहाद् भ्रान्तिर्विकल्पस्तत्क्षयः समः ।
समापि चेद् विकल्पोऽपि सत्याकारः कथं भ्रमः ॥ ११३
॥§ 4340

...umbered अवसाये प्रकाश्यत्वं प्रकाशे च तदात्मता ।
अर्थस्य हानौ न स्याच्च नाम इत्यादिवेदनम् ॥ ११४ ॥§ 4342

...umbered सर्वात्मनिश्चयश्च स्यात् स्पष्टोऽर्थः स्याच्च गौरिति । 553
स्वलक्षणे चासंकेतात् कल्पिकैव भवेन्न धीः ॥ ११५ ॥§ 4344

...umbered तस्मादशेषगोव्यक्तिसामान्येन विभाति धीः ।
गोत्वेन साभिलापेनालीकेनेति तथा प्रथा ॥ ११६ ॥§ 4346

...umbered गवावसाय इत्यस्तु नैते दोषा भवन्त्यतः ।
स्वलक्षणस्याभावेऽपि भ्रान्त्या तदवसायतः ॥ ११७ ॥§ 4348

...umbered यथालीकस्य गोत्वस्य गोबुद्धौ च प्रकाशनम् ।
तादात्म्यं चाव्यतिरिचोऽनारोपो वस्तुतापि च ॥ ११८ ॥§ 4350

...umbered तथा नीलादिनिर्भासेऽलीकस्य धवलादिनः ।
प्रकाशभावसिद्ध्यैव तादात्म्यं सिद्धमिष्यताम् ॥ ११९ ॥§ 4352

...umbered वस्तुतायामनारोपे लिङ्गं तादात्म्यगोत्रकम् ।
गोत्वादिभिरनेकान्तसमारोपमसिद्धकम् ॥ १२० ॥§ 4354

...umbered तदेतत् फल्गु सकलं यतः साकारवादिनाम् ।
सतोऽपि भानं नार्थस्य कुत एवासतो भवेत् ॥ १२१ ॥§ 4356

...umbered स्वरूपस्यैव निर्भासाद् बालस्याप्येष निश्चयः ।
अर्थभानाश्रयास्तस्य किल दोषाः प्रसङ्गिनः ॥ १२२ ॥§ 4358

...umbered कुत्र सङ्केतकरणं शब्दो यस्यावबोधकः ।
कस्यावबोधकः शब्दो यत्र संकेतकक्रिया ॥ १२३ ॥§ 4360

...umbered वाचोयुक्तिरियं कीदृशीदृगेव यदीक्षसे ।
वाच्यवाचकतां क्वापि ममापि प्रतिपादय ॥ १२४ ॥§ 4362

...umbered अलीको यस्य चाकारः किं तस्यापि विशिष्यते ।
अलीके यदि संकेतः सत्याकारे कथं न सः ॥ १२५ ॥§ 4364

...umbered फलं न सत्यप्याकारेऽलीके सुष्ठु न विद्यते ।
अर्थारोपादलीके चेत् सत्ये केन निषिध्यते ॥ १२६ ॥§ 4366

554, 131b/jnams ...umbered कोऽर्थारोपोऽथ सत्यत्वेऽलीकत्वेऽपि स कीदृशः ।
सत्योऽलीकोऽथवाकारो वस्त्वारोपस्तु किंकृतः ॥ १२७ ॥§ 4368

...umbered असत्यगोत्वभानाद् हि भानात् सत्याकृतेर्न किम् ।
सत्येऽपि सत्याकारश्चेत् सत्येऽप्यालीक्यमाकृते ॥ १२८ ॥§ 4370

...umbered असत्यभानादारोपो युक्तः सत्ये कथं भवेत् ।
नन्वसत्येऽपि संकेतोऽसत्यत्वावसितौ कथम् ॥ १२९ ॥§ 4372

...umbered तस्मादर्थक्रियाशक्तवस्त्वारोपात्मनस्तनौ ।
संकेतकरणं सत्यासत्ययोर्न विशिष्यते ॥ १३० ॥§ 4374

...umbered यथातथात्वे वाकारस्यावसायो न विद्यते ।

१२ दि ] शङ्केतः इति मातृकायाम् ।

यदि प्रवृत्तेराक्षेपी बाह्यारोपो न जायते ॥ १४२ ॥[§ 4400]

...umbered सत्याकारमपि ज्ञानं कल्पकं गोचरे ततः ।
प्रवृत्त्याक्षेपणाद् दुष्टं प्रवृत्तिः संसृतिर्यतः ॥ १४३ ॥[§ 4402]

...umbered प्रवृत्तिरविकल्पेऽपि विकल्पेऽपि न सेति चेत् ।
विशेषसरणेऽप्येव तत्रानिष्टिस्ततो न किम् ॥ १४४ ॥[§ 4404]

...umbered अनादिकालिकाभ्यासाद्यथा किञ्चित् क्वचित् क्षमम् ।
तथा विकल्पस्यापीयं योग्यतानिष्टिसाधनी ॥ १४५ ॥[§ 4406]

...umbered विकल्पे क्लेशभावोऽधिसत्त्वानामत एव हि ।
तद्वासनाहतौ यत्नो यावद्धेतुफलस्थितिः ॥ १४६ ॥[§ 4408]

...umbered अलीकगोत्वाकारेण ख्यातिः सिद्धा न गोमतेः ।
सत्याकारोऽपि संकल्पोऽध्यवसायः प्रवर्तनात् ॥ १४७ ॥[§ 4410]

...umbered सत्यस्य गोत्वाकारस्य गोबुद्धौ भासनं यथा ।
तादात्म्यं चाव्यतिरिचोऽनारोपो वस्तुतापि च ॥ १४८ ॥[§ 4412]

...umbered तथा नीलादिनिर्भासे सत्यस्य धवलादिनः ।
प्रकाशभावसिद्ध्यैव तादात्म्यं सत्यमिष्यताम् ॥ १४९ ॥[§ 4414]

556 ...umbered यद्वस्तुरूपं तद्वस्तु गोविकल्पे यथाकृतिः ।
प्रकाशवस्तुरूपं च नीलं न स्फूर्तिरन्यथा ॥ १५० ॥[§ 4416]

...umbered तादात्म्यद्वैधनिर्धूतेः सिद्धो बाधश्च वास्तवः ।
नेक्षते च सितादन्यस्तथानारोपसाधनम् ॥ १५१ ॥[§ 4418]

132a/jnams ...umbered शक्तस्त्वलीकआकारो नोपकारापकारयोः ।
कादाचित्कः स्फुरन्नर्थसमर्थो वा मृषा कथम् ॥ १५२ ॥[§ 4420]

...umbered एतत्स्वरूपबाधे हि बाधकोऽप्यस्य किंकरः ।
ततः स्वयं प्रकाशात्मा शुद्धो वा क्लिष्ट एव वा ॥ १५३ ॥[§ 4422]

४ सेति] सतीति मातृकायाम् ।
१० न] गोमतो इति मातृकायाम् ।

न चावसायस्तेनास्य न विधिर्न च बाधनम् ॥ ५ ॥§ 4468

...umbered अन्यथाख्यातिरस्येति दुष्टं तत्ख्यात्यसंभवात् ।
असत्ख्यातिस्तु विख्याता कल्पिता सदपेक्षया ॥ ६ ॥§ 4470

...umbered लोष्टमेवान्यथाख्यातीत्यभिप्रायान्न सापि किम् ।
व्यवहारेण निर्बन्धः तत्त्वतस्तु न तद्द्वयम् ॥ ७ ॥§ 4472

...umbered अन्यथैवावभासन्ते तद्रूपरहिता अपि ।
इत्युक्तेर्भाविकस्त्वत्र बोद्धव्योऽर्थो यथोदितः ॥ ८ ॥§ 4474

...umbered तथैवादर्शनात् तेषामनुपप्लुतचक्षुषा ।
कल्पितत्वमनेनोक्तमाभासे कनकादिनः ॥ ९ ॥§ 4476

...umbered न बाधः कस्यचित् तत्त्वे संवृत्तौ कल्पितस्य तु ।
प्रकाशिनोऽपि बाधश्चेद् बाधेऽप्याश्वासनं कुतः ॥ १० ॥§ 4478

...umbered अनुमाबाधिकाशा च न वस्तुविषयेति चेत् ।
अवश्यमस्ति वस्त्वात्मनिष्ठासौ नान्यथा प्रमा ॥ ११ ॥§ 4480

...umbered भातमेव पुरा वस्तुविधावध्यवसीयते । 559
निषेधोऽपि स्वभावार्थः पर्यन्ते पर्यवस्यति ॥ १२ ॥§ 4482
अन्तरश्लोकौ ॥ § 4483

...umbered परेण विषयाभावज्ञापनं सपदीष्यते ।
स्वार्थे प्रवृत्तिमज्ञानमभावं गमयेत् कथम् ॥ १३ ॥§ 4485

...umbered स्वगोचरोपस्थानेन विषयान्तरबाधने ।
स्वगोचरस्य तेनापि स्थानात् किं नास्य बाधनम् ॥ १४ ॥§ 4487

...umbered तदर्थकर्महानेश्चेद् भिन्ना सार्थक्रिया यदि ।
अन्यहानेऽन्यहानिः किमभेदे तु स्फुरत्यसौ ॥ १५ ॥§ 4489

...umbered रूपं समीक्ष्य दाहादिहानेः स्पर्शस्य बाधनम् ।
न च स्पर्शः स्फुरत्यत्र बाधा सैवास्य किं परैः ॥ १६ ॥§ 4491

...umbered विषयीकृतमन्यद्वा बाध्येत प्रथमं यदि ।

स्फुरदेव कथं बाध्यमस्फूर्तौ बाधकेन किम् ॥ १७ ॥§ 4493

...umbered न बाधा भिन्नकालत्वे स्वस्वकाले स्फुरत्तया ।
तथैव कालाभेदेऽपि नीलपीतसितादिवत् ॥ १८ ॥§ 4495

...umbered तस्मादारोपवद् बाधः प्रतीत्योत्पादभेदतः ।
कल्पितो न तु तत्त्वेन स्वविन्मात्रे तु का कथा ॥ १९ ॥§ 4497

...umbered यावन्न सिद्धिः स्वविदो बाधकं तावदस्तु चेत् ।
निरूप्य स्वविदोऽसिद्धिं बाधस्तर्हि प्रवर्तताम् ॥ २० ॥§ 4499

...umbered पूर्वं प्रवर्तनारम्भे प्रतिज्ञाबाधमक्षतः ।
यदि ब्रूयात् परज्ञाननिषेधे स्वविदागता ॥ २१ ॥§ 4501

...umbered यथायथार्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा ।
स्वयं तु वित्तिश्छायेव धावतोऽप्यनतिक्रमा ॥ २२ ॥§ 4503

...umbered अतएव निषेधस्य प्रक्रमेऽपि जगौ गुरुः ।
यदीदं स्वयमर्थानां रोचते तत्र के वयम् ॥ २३ ॥§ 4505

560 ...umbered न बाधा चेत् परेणास्ति सिद्धिरप्यस्तु नान्यतः ।
स्ववित्सिद्धिरपीदानीं साधनान्तरतः कथम् ॥ २४ ॥§ 4507

...umbered कुतश्चित् कस्यचित् सिद्धिर्न तत्त्वे किं तु संवृतौ ।
यथा धूमादितोऽग्न्यादेर्मता सिद्धिरियं तथा ॥ २५ ॥§ 4509

...umbered स्ववित्सिद्धिरतत्त्वे चेत् यावत् साध्याङ्गसंस्थितिः ।
तावत् तदेव तत्त्वं यत् सिद्धं साधनशक्तितः ॥ २६ ॥§ 4511

...umbered यत्साधनबलात् सिद्धे स्वविन्मात्रे पुनः परम् ।
सिद्धिबाधनयोरस्ति नावकाशः कुतश्चन ॥ २७ ॥§ 4513

...umbered न बोधयन् किंचिदन्यत् प्रस्तुतत्यजनक्षमः ।
प्रस्तुतं वा त्यजन् नान्यस्यान्यतो ग्रहणक्षमः ॥ २८ ॥§ 4515

...umbered अतएव परज्ञानं गृह्यमाणं स्वबाधनम् ।

२२ त्] न बोधन् किञ्चिदन्यस्मादिति मातृकायाम् ।

स्ववित्तिहेतुत्रैरूप्यज्ञानस्याप्यवकाशतः ॥ २९ ॥§ 4517

...umbered त्यक्तं तु तेषां रूपाणामबोधेऽपि न बाधकम् । 133a/jnams
साध्यसिद्धेः प्रकाशो हि विद्यते परतो न तु ॥ ३० ॥§ 4519

...umbered स्वतोऽपि मा भूदिति चेत् यदि भासो न सर्वथा ।
युक्तमेतत् प्रकाशस्तु सन्नास्त्यस्मान्न किं स्वतः ॥ ३१ ॥§ 4521

...umbered प्रकाशोऽस्ति न तु स्वस्मादतोऽन्यस्मात् कथं न चेत् ।
अन्यथा बाधकं यद्वत् तद्वन्नास्ति स्वतो मतौ ॥ ३२ ॥§ 4523

...umbered स्वात्मन्यथ क्रियारोधो धारयोः स्वच्छिदा न हि ।
धारापि तीक्ष्णा स्वयमित्युच्यते किं न सूरिणा ॥ ३३ ॥§ 4525

...umbered स्वहेतोरेव तीक्ष्णा सा जायते नान्यतो यदि ।
प्रकाशरूपज्ञानं च स्वहेतोरेव जायते ॥ ३४ ॥§ 4527

...umbered उपकार्योपकारित्वकृतं मा भूत् प्रकाशनम् ।
तद्रूपजन्म रूपं तु स्वयंशब्देन शब्दितम् ॥ ३५ ॥§ 4529

...umbered यथा प्रदीपपटयोरुपकारात् प्रकाशनम् । 561
दृष्टं तथा प्रदीपस्य स्वयं किं न समीक्षितम् ॥ ३६ ॥§ 4531

...umbered अक्षापेक्षापि दीपे चेत् सा कुम्भे किं न विद्यते ।
तत्सत्त्वेऽपि घटो दीपं दीपो नान्यमपेक्षते ॥ ३७ ॥§ 4533

...umbered यत्नादौ सत्यपि यथा परप्रेरणवारणात् ।
स्वयंगमोक्तिस्तज्ज्ञातिवारणैव स्वभासने ॥ ३८ ॥§ 4535

...umbered आगमेऽपि स्वयंवित्तेर्बाधे च प्रतिभाति या ।
ग्राह्यग्राहकभावस्य सूक्ष्मस्य तदपोहनम् ॥ ३९ ॥§ 4537

...umbered एकत्र फलहेतुत्वं यथाशङ्क्य निवारितम् ।
ग्राह्यग्राहकतैकत्र तथाशङ्क्य निवारिता ॥ ४० ॥§ 4539

...umbered न कर्मकर्तृभावेन स्वप्रकाशमतो मतम् ।
परानपेक्ष्य भासन्तु स्वहेतोरुदितं मनः ॥ ४१ ॥§ 4541

...umbered सन्धिनिर्मोचने व्यक्तं तदर्थप्रतिपादनात् ।
अर्थाभासप्रवृत्त्यादिवचनैरपि सूचनात् ॥ ४२ ॥[§ 4543]

...umbered तस्मान्न युक्त्यागमयोः प्रतिबोधि स्वसंवेदनम् ।
दोषः स एवान्यविदं बाधतेऽग्निरिव द्रुमम् ॥ ४३ ॥[§ 4545]

...umbered न च स्ववित्तिव्यापारं परवित्तिग्रहोऽर्थितः ।
यतोऽस्य गुणदोषाभ्यां स्ववित्तेरवलेपनम् ॥ ४४ ॥[§ 4547]

...umbered दोषो न सत्तामात्रेण व्यापारेण तु स स्मृतः ।
अकार्यकृतिकालस्था निग्राह्या क्ष्मादयो न हि ॥ ४५ ॥[§ 4549]

...umbered न स्ववित्तेरतो दोषः परवित्तेस्तु विस्तरात् ।
तदन्यवित्तिव्यावृत्तः प्रकाशो नियतः स्वयम् ॥ ४६ ॥[§ 4551]

...umbered न स्वतो नापि परतो भासश्चेद् भास एव न ।
नालोष्टादिसमानस्य वक्तुमेतच्च साम्प्रतम् ॥ ४७ ॥[§ 4553]

562 ...umbered स्वतोऽन्यतश्च व्यावृत्तावपि भासो यदीष्यते ।
एकानेकवियोगोऽपि वस्तुनः सत्त्वमस्तु वः ॥ ४८ ॥[§ 4555]

...umbered एकानेकवियोगेऽपि यदि वस्तु सदिष्यते ।
स्वतोऽन्यतश्चाभावेऽपि भावो भासस्य किं न वः ॥ ४९
॥[§ 4557]

...umbered भासमानास्तथाप्येते न भावाः शक्यनिह्नवाः ।
असाधारणभासत्वात् ज्ञानत्वं च भविष्यति ॥ ५० ॥[§ 4559]

...umbered रूपनिर्भासतोऽध्यक्षरूपताप्यस्ति वास्तवी ।
न च स्ववित्तौ दोषश्चेत्यतः किञ्चिन्न दुष्यति ॥ ५१ ॥[§ 4561]

...umbered ननु स्ववित्तिर्नीलस्येत्येतदेव कुतो भवेत् ।
न हीदमेकमात्मानं वेत्ति येन स्ववेदनम् ॥ ५२ ॥[§ 4563]

...umbered अन्तः शातादिरूपस्य बहिः शीतशितादिनः ।
भासनात् कस्य केनास्तु कथं वित्तिर्न चैकता ॥ ५३ ॥[§ 4565]

...umbered भासनं तावदस्त्येषां तन्निषेद्धुं न शक्यते ।

न भेदे तच्च युक्तं चेदभेदोऽस्तु धियस्तदा ॥ ५४ ॥[§ 4567]

...umbered भिन्नाकृतीनामेतेषामभेदोऽपि कथं भवेत् ।
तत्किमिष्टो द्वयाभावो भाव एव द्वयस्य वा ॥ ५५ ॥[§ 4569] 133b/jnams

...umbered भेदोऽभेदो द्विधाऽद्वेधा धीरूपेऽस्तु यथा तथा ।
नालीकत्वं प्रकाशस्य बाधगन्धविरोधिनः ॥ ५६ ॥[§ 4571]

...umbered न हि स्वानुभवस्यास्ति बाधः क्वाप्युपपत्तिभिः ।
स एव तासां प्रभवो निष्ठा तत्रैव वा यतः ॥ ५७ ॥[§ 4573]

...umbered भेदादिरेव चिन्त्योऽस्तु न प्रकाशस्य वारणम् ।
यत्र प्रकाशविश्रामः स्वः परो वा स एव सन् ॥ ५८ ॥[§ 4575]

...umbered सत्त्वे च स्वविदः सिद्धे किमेकानेकचिन्तया ।
तदभावादभावेन तस्याः किल फलस्थितिः ॥ ५९ ॥[§ 4577]

...umbered प्रकाशमात्रे सिद्धेऽपि स्ववित्तिः कथमुच्यते । 563
तावता चार्थसंसिद्धौ किं स्ववित्तिगिरापि नः ॥ ६० ॥[§ 4579]

...umbered प्रत्यक्षबाधा हि परप्रतिज्ञा या विवक्षिता ।
स्वरूपस्य परेणापि प्रकाशे सा च सिध्यति ॥ ६१ ॥[§ 4581]

...umbered स्वरूपसाक्षात्करणादध्यक्षत्वं न चापरम् ।
परेणापि प्रकाशस्य रूपं तावद् विभाति तत् ॥ ६२ ॥[§ 4583]

...umbered तथापि स्वविदस्त्येव किं तु स्वस्येति न स्वयम् ।
बाधासिद्धौ तथान्येन वित्तिवादेऽपि न क्षतिः ॥ ६३ ॥[§ 4585]

...umbered न सिद्धापरवित्तिश्च स्ववित्तिश्च न सिध्यति ।
ततः प्रत्यक्षता नाम कीदृशी बाधनं यया ॥ ६४ ॥[§ 4587]

...umbered साक्षात्कारस्वरूपस्य प्रत्यक्षत्वमुदीरितम् ।
विशेषलक्षणस्यापि नैव क्षतिरनिश्चये ॥ ६५ ॥[§ 4589]

...umbered सामान्येन विशेषाणां यथा व्याप्तिस्तथास्य तैः ।
सिद्धे विशेषं सामान्यं सामान्येऽन्यतरः स च ॥ ६६ ॥[§ 4591]

...umbered अन्यस्यासंविदोऽन्येन यदि व्याप्तिग्रहो हतिः ।
विप्लुतोऽन्यग्रहश्चास्तु स्ववित्तेः कियती क्षतिः ॥ ७९ ॥§ 4617

...umbered अनुपेतप्रमाणस्य ज्यायसी मूकतैव यत् ।
ब्रुवता नियतं किञ्चिद् बाध्यं वा साध्यमेव वा ॥ ८० ॥§ 4619

...umbered संवृतो मानमिष्टं चेद् विचारोऽप्येष संवृतिः ।
संवृतावपि नेष्टं चेद् ब्रुवन् जेता यथातथा ॥ ८१ ॥§ 4621 134a/jnams

...umbered न च हेतौ प्रकाशादावप्येवं बाधसंभवः ।
असाधारणनिर्भासव्यत्ययस्याप्रसाधनात् ॥ ८२ ॥§ 4623

...umbered अमुनापि समक्षेण विषयीकृतिमात्रकम् ।
न सत्तासिद्धिरस्येति बाधकावसरो न किम् ॥ ८३ ॥§ 4625

...umbered विधिसाधनमानेन विषयीकरणात्परम् । 565
न सत्तासाधनं क्वापि शक्तिः सत्ता तु लौकिकी ॥ ८४ ॥§ 4627

...umbered सर्वत्र मानविहिते सत्ताभेदस्य साधनम् ।
युक्तं नाशादिवत् सत्ताबाधकं तु विरुध्यते ॥ ८५ ॥§ 4629

...umbered तस्मात् स्वं वा परं वा स्यात् प्रत्यक्षं विषयस्य तु ।
यस्य स्वरूपनिर्भासः स एवाध्यक्षगोचरः ॥ ८६ ॥§ 4631

...umbered तदतद्रूपविमतावपि बोध्यवपुः स्थिरम् ।
ज्ञानज्ञेयोपनयनादेव साधकबाधकम् ॥ ८७ ॥§ 4633

...umbered न स्वरूपेण रूपं तु गवेष्यं भ्रान्तिशान्तये ।
प्रतिभासिनि रूपे च न भ्रान्तेरस्ति संभवः ॥ ८८ ॥§ 4635

...umbered कल्पनापोढमेवास्तु किमभ्रान्तपदं तदा ।
भ्रान्तिद्वैविध्यनिर्वाहनिर्बन्धोऽपि मुधेति चेत् ॥ ८९ ॥§ 4637

...umbered *सत्यमाचार्यदिग्नागपादेन कृतमेव तत् ।
वार्तिके तु कृतं लोकस्याकारे बाह्यरोपणात् ॥ ९० ॥§ 4639

११ म् ] करणाप० इति मातृकायाम्
२३ * ] ०दिङ्गाङ्गपादेन इति मातृकायाम् ।

...umbered आकारमाकारतया शुक्तिं शुक्तितया तथा ।
यदि विद्याज्ज्ञनः क्वापि कथं स्यात् कस्यचित् भ्रमः ॥ ९१ ॥§ 4641

...umbered अतदात्मनि तादात्म्यव्यवसायस्तदा द्वयोः ।
विकल्पवर्जनेनैव निवर्त्य इति युज्यते ॥ ९२ ॥§ 4643

...umbered यदा त्वर्थग्रहो ज्ञानस्याकारे सर्वदेहिनाम् ।
दृष्टोऽतिस्पष्टविच्छिन्नप्रतिभासे विशेषतः ॥ ९३ ॥§ 4645

...umbered तदा मृषार्थग्रहणं तदध्यक्षमकल्पनात् ।
प्राप्तं गृहीतग्रहवत् तद्द्वितीयं विशेषणम् ॥ ९४ ॥§ 4647

...umbered लोकबुद्धिमपेक्ष्यैव सतैमिरमितीरितम् ।
स्पष्टाभस्यास्य कल्पत्वमोहापोहाय चापरम् ॥ ९५ ॥§ 4649

566 ...umbered तत् तत्त्वचिन्तावसरे कल्पितापेक्षयैव सा ।
भ्रमव्यवस्था स्पष्टाभे न स्वाकारव्यपेक्षया ॥ ९६ ॥§ 4651

...umbered भ्रमत्वमविकल्पेऽपि विकल्पान्न ततः परम् ।
अतो विकल्पे विश्रान्तमविकल्पेऽपि कथ्यते ॥ ९७ ॥§ 4653

...umbered विकल्पकस्य भ्रान्तत्वे भ्रमोऽन्यः स्यान्न वा भवेत् ।
विकल्पकस्याभ्रान्तत्वे भ्रम एव न विद्यते ॥ ९८ ॥§ 4655

अन्तरश्लोकौ ॥ § 4656

...umbered निर्भासिनः समक्षत्वमसत्यत्वमपोहति ।
अतः प्रकाशे मिथ्यात्वमर्थस्यैव न धीतनोः ॥ ९९ ॥§ 4658

...umbered तस्मान्माने भिदाभेदविवादेऽपि प्रकाशिनः ।
प्रत्यक्षगोचरावस्था सिद्धा सत्त्वं तदेव च ॥ १०० ॥§ 4660

...umbered तच्चित्रमेतदद्वैतं ग्राह्यादिविरहान्मतम् ।
सांवृती पुंवदेकाख्यानेकव्यवहृतिर्मुधा ॥ १०१ ॥§ 4662

...umbered यावदेव बहिरध्यवसायस्तावदेव पृथगेतदिदं च ।
तन्मतिस्तु सकलेति स एव ज्ञानपाणिचरणादिरसौ हि ॥ १०२ ॥§ 4664

...umbered नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥ १०३ ॥§ 4666

...umbered यद् यथा भासते ज्ञानं तत्तथैवानुभूयते ।
इति नामैकभावः स्याच्चित्राकारस्य चेतसः ॥ १०४ ॥§ 4668

संग्रहश्लोकौ ॥ § 4669

...umbered चित्रविज्ञान इत्याभ्यामेकानेकात्ययः क्रमात् ।
ज्ञानोपाधितया बाध्यं विविच्याशक्यदृक्तया ॥ १०५ ॥§ 4671

...umbered मुधानेकध्वनिस्तं हीत्यादिना शेषसंग्रहः ।
यद् यथेत्यादिना युक्तिरेकसंज्ञा तदेकता ॥ १०६ ॥§ 4673

...umbered प्रत्यक्षानुमयोर्नापि विरोधे शक्तिसंशयः । 567, 134b/jnams
अक्षापेक्षानुमा नित्यं नानुमापेक्षमक्षजम् ॥ १०७ ॥§ 4675

...umbered परिहृत्य यथाध्यक्षविरोधमनुमोदयः ।
तथानुमाविरोधं न परिहृत्याक्षसंभवः ॥ १०८ ॥§ 4677

...umbered परोक्षे चानुमान्यत्र विरोध इति कः क्रमः ।
अक्षेण बाध्यते कोऽर्थो नेयं तद्गोचरे प्रमा ॥ १०९ ॥§ 4679

...umbered स्वात्मसत्तास्थितावक्षादनुमानाद् गुणान्तरम् ।
प्रत्यक्षेणाव्यवहृतेः परोक्षत्वव्यवस्थितेः ॥ ११० ॥§ 4681

...umbered ततोऽध्यक्षान्तरेणापि नानुमायास्तुला क्वचित् ।
स्वसंवित्त्या तु यत् सिद्धं तत्र चिन्तैव कीदृशी ॥ १११ ॥§ 4683

...umbered स्ववित्तिरेवापरमानयोर्निर्न चेत् प्रमाणं किमिह प्रमाणम् ।
अतस्तया साधितबाधितेषु न बाधसिद्ध्योरपरस्य शक्तिः ॥
११२ ॥§ 4685

अन्तरश्लोकः ॥ § 4686

...umbered एकानेकात्ययेऽप्यस्मात् स्फुरतः केन वारणम् ।
न च ताभ्यां स्थितिव्याप्तिः प्रत्यक्षेणैव बाधनात् ॥ ११३
॥§ 4688

४ सः ] प्र. वा. २. २२०-१

...umbered लक्षणस्य क्रियाकाले व्याप्तिविद्य हतामुना ।
बहिरेवैष नियमः सामर्थ्यादवतिष्ठते ॥ ११४ ॥[§ 4690]

...umbered द्वैतेऽपि न बहिर्धर्मः सर्वः साधारणो धियः ।
स्थैर्यास्थैर्यवदद्वैते स्यान्न यद्येष न क्षतिः ॥ ११५ ॥[§ 4692]

...umbered पूर्वापरतया व्याप्तं स्थैर्यादि न तदत्यये ।
एकानेकतयाव्याप्तिः स्थितेर्बुद्धौ न संविदः ॥ ११६ ॥[§ 4694]

...umbered व्याप्तिरेवाथ तदपि सत्त्वादस्त्येकमेनयोः ।
सर्वाकारावसायो हि न प्रत्यक्षेऽपि वस्तुनि ॥ ११७ ॥[§ 4696]

...umbered भासमाने च नीलादौ भास एव समक्षधीः ।
ततो भेदोऽथ निर्भेदशङ्का पीतादिनः पुनः ॥ ११८ ॥[§ 4698]

568 ...umbered तत्रापि व्यतिनिर्भासादेवाभेदव्यवस्थितिः ।
भेदे हि भेदसन्तानज्ञानवन्न प्रकाशनम् ॥ ११९ ॥[§ 4700]

...umbered उपादानाभिदोऽन्योन्यं प्रकाश इति चेदसत् ।
उपादानाभिदप्येषां न हि भेदमपोहति ॥ १२० ॥[§ 4702]

...umbered प्रत्यासत्तिर्यदप्यस्ति ग्रहणार्थस्तु को भवेत् ।
सैव चेत् स्फुरणं साक्षात् न भवेत् सैव हि प्रथा ॥ १२१ ॥[§ 4704]

...umbered तद्बलाद्य ग्रहे हेतुफलयोः किं न वेदनम् ।
सान्निध्यतारतम्यं तु तत्रैवैतदपेक्षया ॥ १२२ ॥[§ 4706]

...umbered परस्परग्रहार्थोऽत्र साहित्यस्फुरणं यदि ।
आसन्नदेशस्फुरणमग्रहेऽपि मिथो न किम् ॥ १२३ ॥[§ 4708]

...umbered तस्मान्न चित्रभासः स्यात् संस्तु न क्षमते भिदाम् ।
अन्योन्यसंविदावेशात् स्वभावाभेदलक्षणात् ॥ १२४ ॥[§ 4710]

---

१० पुनः ] ततो भेदिनी भेदशङ्केति मातृकायाम् ।

२० मिथो ] मथो इति मातृकायाम् ।

...umbered चित्रादेव सदोत्पत्तावेकोपादानतापि का ।
न सङ्कोचदशायामप्येकान्ताच्चित्रनिश्चयः ॥ १२५ ॥ § 4712

...umbered यावच्च जन्म चित्रस्य चित्रादेवोपलभ्यते ।
भिन्नोपादानता तावत् क्षमते न मिथः प्रथाम् ॥ १२६ ॥ § 4714

...umbered उपादानस्य यदि च चित्रस्याप्येकतास्थितिः ।
उपादेयस्य किं नेति चित्राद्वैतमबाधितम् ॥ १२७ ॥ § 4716

...umbered कथं वा नीलमप्येकमथाणुप्रतिभासनम् ।
ततोऽनेकस्थितिभ्रंशे केन कस्य स्थिरैकता ॥ १२८ ॥ § 4718

...umbered एकानेकत्वविरहोऽप्यत एवेति चेन्मतिः ।
अस्तु सत्त्वस्य बाधा तु न शक्येति निवेदितम् ॥ १२९ ॥ § 4720

...umbered एतत्तु प्रकृतं भेदे युक्तं नान्योन्यभासनम् ।
उपादानाभिदो नाम नोत्तरस्य बलं यतः ॥ १३० ॥ § 4722

569

तस्मात्, § 4723

...131 सहोपलम्भनियमादभेदो नीलपीतयोः ।
स्वभावो हि तयोः संविदभिन्नेति भिदा कुतः ॥ १३१ ॥ § 4725 135a/jnams

...umbered संवित्तिनियमो नास्ति भिन्नयोर्नीलपीतयोः ।
इत्थमर्थे पतेत् पुंभ्यामेकैकस्यापि दर्शनात् ॥ १३२ ॥ § 4727

तदाह, § 4728

...133 नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥ १३३ ॥ § 4730

...umbered यद् यथा भासते ज्ञानं तत्तथैवानुभूयते ।
इति नामैकभावः स्याच्चित्राकारेऽपि चेतसि ॥ १३४ ॥ § 4732

...umbered बाह्यवन्न हि बोधेऽपि पुंसोरेकैकदर्शनम् ।
यतोऽन्यथापि ग्रहणान्नियमस्य पराहतिः ॥ १३५ ॥ § 4734

---

२२ सि] प्र. वा. २. २२०-१

...umbered भासते यद्यदेकं तद् यथा चित्रे सिताकृतिः ।
भासते चाखिलं चित्रं पीतशीतसुखादिकम् ॥ १३६ ॥[§ 4736]

...umbered एकाभिमतबोद्धारमपेक्ष्येदमुदीरितम् ।
नानैकान्तिकता तस्मात् सन्तानान्तरभासिना ॥ १३७ ॥[§ 4738]

...umbered दृष्टान्ते साध्यशून्यत्वं न विपर्ययबाधकात् ।
भासः स्थूलतया व्याप्तो न ह्यसावणुशो भिदि ॥ १३८ ॥[§ 4740]

...umbered एकैकाणुनिमग्नत्वात् संवित्तिर्न परस्परम् ।
न चैकाणुप्रकाशोऽस्ति स्थूलमेव स्फुरत्यतः ॥ १३९ ॥[§ 4742]

...umbered बाह्याणूनां प्रतीभासो बुद्धिरेका स्थवीयसी ।
ज्ञानाणूनां क एकस्तु प्रतिभासो भविष्यति ॥ १४० ॥[§ 4744]

...umbered अनेकत्राप्यवयविन्येका चित्राकृतिर्मतिः ।
खण्डशो व्यवहाराय साध्वी बुद्धौ तु का गतिः ॥ १४१ ॥[§ 4746]

570 ...umbered एकत्राप्यंशिनि मितिः साकारैका प्रसाधिता ।
व्यवहारोऽन्यथा नेति स्थौल्यं ज्ञानस्य दुस्त्यजम् ॥ १४२ ॥[§ 4748]

...umbered तस्मात् स्थूलतया व्याप्तो निर्भासस्तन्निवृत्तितः ।
निवर्तमानोऽनेकस्मादेकत्वे विनयस्य ते ॥ १४३ ॥[§ 4750]

...umbered यथा सजातीयमताद् भागाद् भेदनिराक्रिया ।
अनाभासप्रसङ्गेन विजातीयमतात्तथा ॥ १४४ ॥[§ 4752]

...umbered तन्नास्तु साध्यो दृष्टान्तो न चाशङ्काविपर्यये ।
साध्यस्याध्यक्षबाधापि नाध्यक्षस्याप्रतिष्ठितेः ॥ १४५ ॥[§ 4754]

...umbered न मानमन्यग्रहणं न भेदग्राहिका स्ववित् ।
भिन्नमस्मादिदमिति विकल्पो वासनान्वयः ॥ १४६ ॥[§ 4756]

...umbered यथा बाह्यं स्वतो भिन्नं स्वतन्त्रः कल्पयत्ययम् ।
बाह्यं बाह्यान्तराद्भिन्नं तथा कल्पयति स्वयम् ॥ १४७ ॥[§ 4758]

...umbered बाह्ये सत्यपि नान्यस्मादध्यक्षं भेदवेदनम् ।
अन्यस्यापि ग्रहप्राप्तेस्तद्विशिष्टात्मनो ग्रहात् ॥ १४८ ॥[§ 4760]

...umbered अस्माद्भिन्नमितीदं चेत् स्वरूपं ग्राह्यवस्तुनः ।
सावधेरस्य भासः स्यान्न वा ग्राह्यं तदात्मना ॥ १४९ ॥[§ 4762]

...umbered विनावधिं प्रतीतो हि भेदोऽभेदः कथं न सः ।
भेदोपचारमात्रं स्यान्न भेदस्तत्त्वतस्ततः ॥ १५० ॥[§ 4764]

...umbered परासंकीर्णरूपस्य ग्रहणं किल भेदवित् ।
परासंकीर्णमन्यस्माद् भिन्नमेकार्थमीदृशम् ॥ १५१ ॥[§ 4766]

...umbered न ह्यन्यसंकीर्णगतावन्यस्याप्युचितो ग्रहः ।
अन्याग्रहे ह्यकीर्णस्य केवलस्याग्रहः कथम् ॥ १५२ ॥[§ 4768]

...umbered केवलो यत एवायं भाति तेनैव नान्ययुक् ।
अन्यस्यापि प्रकाशे हि गृहीतः केवलः कथम् ॥ १५३ ॥[§ 4770]

...umbered केवलस्य ग्रहो न स्यादन्यस्य स्फुरणे यथा । 571
अन्यस्यास्फुरणेऽप्येवं परामिश्रो हि केवलः ॥ १५४ ॥[§ 4772]

...umbered अमिश्रोऽयं परेणेति विवर्तो मनसो यथा ।
तथैव यद्यनुभवः परधीः केन वार्यते ॥ १५५ ॥[§ 4774] 135b/jnams

...umbered परिहृत्य परं तातो यथा मिश्रग्रहो न सन् ।
परिहृत्य परं तातस्तथा भिन्नग्रहो न सन् ॥ १५६ ॥[§ 4776]

...umbered वस्तुमात्रग्रहस्तस्मादध्यक्षेणेति युज्यते ।
न भिन्नं नापि चाभिन्नं ग्रहीतुं तेन शक्यते ॥ १५७ ॥[§ 4778]

...umbered न भेद्यभासादवधेर्ज्ञातं नाभेद्यशङ्करात् ।
नान्यच्च भेदाभेदाभ्यां वस्तु वस्तुग्रहः कथम् ॥ १५८ ॥[§ 4780]

...umbered सर्वमर्थाव्यतिभिदि ज्ञानादपि भिदा कुतः ।
भेदे चावधिमानेऽपि सर्वः सर्वस्य गोचरः ॥ १५९ ॥[§ 4782]

...umbered किं तु बाह्यग्रहावेशे चिन्तायां दूषणं समम् ।
यथा भेदग्रहानिष्टौ तथा सत्यवधिग्रहे ॥ १६० ॥[§ 4784]

...umbered तस्माद् बाह्यग्रहश्चक्षुर्निर्मील्यास्तु यथा तथा ।
भेदाग्रहं त्वनुवदन् तत्त्वविद् बाध्यतां कथम् ॥ १६१ ॥§ 4786

...umbered नाध्यक्षं भेदकृत् कल्पं तस्करस्त्विह तत्करः ।
स स्वापराधमध्यक्षे क्षिपतीति भिदः स्थितिः ॥ १६२ ॥§ 4788

...umbered नीलादिव तदेकं च कथमेतत् समेतु चेत् ।
नीलमंशान्तरं चैकमिति किं भाति सङ्गतम् ॥ १६३ ॥§ 4790

...umbered नैकं तदपि चेत् तर्हि क्वाणुतो भिदि भासनम् ।
न परीक्षाक्षमश्चाणुः कुतः कस्य तदा भिदा ॥ १६४ ॥§ 4792

...umbered मा भूदवस्तुतो वा चेत् सोऽप्येकत्वहतौ भवेत् ।
निर्भासादेकतासिद्धौ स्ववित्तेर्वस्तुता स्थिता ॥ १६५ ॥§ 4794

572 ...umbered अथ देशवितानाप्तिर्नामान्तरवियोगिनः ।
न देशभानहानौ च भास इत्यपि शक्यते ॥ १६६ ॥§ 4796

...umbered न स्वात्मान्तरमन्यात्मा स बाह्यस्यैव युज्यते ।
बुद्धेः स्ववित्तिनिष्ठाया यः परस्तस्य का गतिः ॥ १६७ ॥§ 4798

...umbered भिन्नोऽपि देशभेदेन बाह्यार्थो गृह्यते धिया ।
धीस्तु देशभिदा भिन्ना केनास्तु व्यवहारभाक् ॥ १६८ ॥§ 4800

...umbered स्थूलदेशापि तेनैक्यान्न बुद्धिर्भेदमर्हति ।
यथा न भेदोऽस्याभेदे भेदकस्तद्वदाकृतेः ॥ १६९ ॥§ 4802

...umbered चित्रं तदेकमिति चेदिदं चित्रतरं ततः ।
ततश्चित्रतमं चेदं यद्भेदे वेदनं मिथः ॥ १७० ॥§ 4804

...umbered चित्रैकबुद्धिनिर्भासे बाह्यः स्याद् वा न वा भवेत् ।
अनाभासप्रसङ्गेऽस्या न बाह्यानि न बुद्धयः ॥ १७१ ॥§ 4806

...umbered अणुत्वे तदभावे वा न धीभासस्य सङ्गतिः ।
तस्मादणुत्वाभावाभ्यां विरुद्धं भासनं धियः ॥ १७२ ॥§ 4808

९ चेत् ] वाचेदिति मातृकायाम् । १९ ततः ] प्र. वा. २. २००
१७ देशापि ] तेनयेन्नेति मातृकायाम् ।

तदाह, § 4809

...173 नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥ १७३ ॥§ 4811

...umbered यद् यथा भासते ज्ञानं तत्तथैवानुगम्यते ।
इति नामैकभावः स्याच्चित्राकारस्य चेतसः ॥ १७४ ॥§ 4813

...umbered ज्ञानत्वेन विशिष्टोऽयं नीलादिश्चित्रवेदने ।
मिथः स्वरूपानापन्नोऽस्थूलो द्रष्टुं न शक्यते ॥ १७५ ॥§ 4815

...umbered भेदस्य प्रत्यणु प्राप्तेर्नीलादि चय एव वा ।
अशक्यो द्रष्टुमुदित एकैकस्य ग्रहाद् धिया ॥ १७६ ॥§ 4817

...umbered अनेकाकार एकोऽत एष्टव्योऽनुभवो यतः । 573
अस्मादिदं भिन्नमिति प्रकल्पयति पृष्टजम् ॥ १७७ ॥§ 4819

...umbered अत एव च नीलादि भिन्दन्नर्थं विवेचयेत् ।
न बुद्धिरूपं तद्भेदे न ज्ञानं न च गोचरः ॥ १७८ ॥§ 4821

...umbered तस्माद् येन प्रकारेण करणेन चकास्ति धीः ।
स्थूलैकत्वेन तेनैव विशिष्टा सोपगम्यते ॥ १७९ ॥§ 4823

...umbered विरुद्धधर्माध्यासश्च तत्र भेदाय कल्पते ।
यत्राध्यक्षकृतो भेदो व्यवहारप्रसाधनात् ॥ १८० ॥§ 4825 136a/jnams

...umbered स्वयं वेदनमेवात्र प्रत्यक्षं न च तद्भिदे ।
नीलादित्वे विकल्पोऽनुवर्तकस्तस्य नो भिदि ॥ १८१ ॥§ 4827

...umbered निर्भासभेदाद् भेदश्चेत् स एवाकार उच्यते ।
बहिर्मेये प्रमाणं स तत्र मेये स्ववित् प्रमा ॥ १८२ ॥§ 4829

...umbered स्वविदेकीकृतस्यास्य भेदाद् भिन्नं कथं बहिः ।
यथा धियोऽक्षाद् ग्रहणं स्वविदा भेदनं तथा ॥ १८३ ॥§ 4831

...umbered स्फुरणं प्रतिभासश्चेत् सा स्ववित्न च विद्यते ।

५ सः ] तत्रैव २. २००-१; प्रकाशत इति चेतसीति च तत्र पाठः ।

...umbered सर्वत्र हेतौ व्याप्तिस्तु प्रमासिद्धिमपेक्षते ।
व्यापकानुपलम्भादौ सा च ज्ञेया विपर्यये ॥ १९४ ॥§ 4854

...umbered मानसिद्धं न च व्याप्तिव्याप्यं नोपगतं स्वयम् ।
परवित् परवित्त्यैव बाध्यते त्विति कीर्तितम् ॥ १९५ ॥§ 4856

...umbered न च स्वभावस्वीकारोऽवश्यमेकादिकर्षकः ।
व्याप्तेरसिद्धेरद्यापि प्रमाणव्याहतं च तत् ॥ १९६ ॥§ 4858

...umbered प्रमाणव्यस्तरूपेण व्याप्तिमादाय तद्गतेः ।
यदि भावास्वभावत्वं खरशृङ्गात्ययान्न किम् ॥ १९७ ॥§ 4860

...umbered एकानेकात्ययात् तर्हि बाह्यस्यापि कथं क्षतिः । 575
तत्त्वतोऽनुपलम्भेन ग्राह्यलक्षणहानितः ॥ १९८ ॥§ 4862

...umbered न चानशैकता किं तु विविच्याशब्ददर्शनम् ।
तच्च नास्ति बहिस्तस्याभावतस्तत्समुच्चयः ॥ १९९ ॥§ 4864

...umbered विविच्याशक्यदर्शित्वमेवैकत्वमणावपि ।
चित्रज्ञाने तदक्षीणमरुचिः क्वोपयोगिनी ॥ २०० ॥§ 4866

...umbered बुद्धौ तु चित्ररूपायामशक्यैकविवेकदृक् ।
परचित्तविवेकेन तदेकानेकलक्षणम् ॥ २०१ ॥§ 4868

...umbered तदाह नीलादीत्यादि स्फुटातोऽन्यधियोऽन्यता ।
सा कुतोऽनुमितेः सा चेत् संवृत्त्यास्तु यथा तथा ॥ २०२ ॥§ 4870

...umbered तथापि कल्पितं नित्यमपेक्ष्य क्षणिता यथा ।
दृढप्रकल्पान्यमनोऽपेक्ष्यमेकं तथा धियः ॥ २०३ ॥§ 4872

...umbered तर्ह्यशक्यविवेकैकाभावेऽप्यन्यतया ततः ।
शक्यभेदमनेकं स्याद् बाह्येऽप्येकचयेन किम् ॥ २०४ ॥§ 4874 136b/jnams

...umbered नैवं यथांशिनि हते त्वणुरेकोऽवतिष्ठते ।
ततस्तत्प्रचयोऽनेकस्तद्दोषादेव दूषितः ॥ २०५ ॥§ 4876

...umbered तथा तत्प्रतिरूपेऽस्मिन्नेकानेकात्यये कृते ।
एकसंहतिरेवायमनेको वादिसंमतः ॥ २०६ ॥§ 4878

...umbered शक्यमेवमपि ख्यातुमिति बाह्याधिकारतः ।
अवयव्यणुचिन्ताद्यकृतिनोऽभूत्पराश्रयात् ॥ २०७ ॥§ 4880

...umbered यदा च चित्रबुद्ध्यैव बाधकान्तरहानितः ।
एकानेकत्वयोर्बाधः सिद्धिः किं न तया तयोः ॥ २०८ ॥§ 4882

...umbered एकत्वे चित्रताभावो नानात्वे सुतरां यथा ।
चित्रत्वान्नैकता यद्वदेकानेकस्थितिस्तथा ॥ २०९ ॥§ 4884

576 ...umbered विना विरुद्धोपनयान्न बाधा प्रतियोगिनः ।
तथानेकहतावेकस्त्वविदन्तर्गमाद् वद ॥ २१० ॥§ 4886

...umbered तथा च व्यापकाभावविप्लवः स्यान्मतस्थितेः ।
अस्माकं तु न दोषोऽयं द्वयोश्चेन्मानसिद्धता ॥ २११ ॥§ 4888

...umbered सर्वावकारहानेन किमेकं न समं क्वचित् ।
एकतानेकताभ्यां तत् स्फुरत्ताभ्यां तदन्वितम् ॥ २१२ ॥§ 4890

...umbered स्यान्नाम तत एकत्वं भेदाभेदात्मचित्रके ।
अथैकस्यान्यबाधाय साधनं स्थितये न तु ॥ २१३ ॥§ 4892

...umbered तस्यापि बाधनात् पश्चात् प्रत्याशा महतीदृशी ।
प्रमाणादेकसिद्धिश्चेत् पश्चाद् बाधः कथं भवेत् ॥ २१४ ॥§ 4894

...umbered प्रमाणान्नैकसिद्धिश्चेदन्यबाधः कथं भवेत् ।
एकात्ययो नान्यविधिः स्याद्विरोधः स्वयं यदि ॥ २१५ ॥§ 4896

...umbered विधिश्च चित्रधीर्हन्याद्विरुद्धोपनयात् परम् ।
उदीर्यमाणः शक्तश्चेदहो प्रामाणिकस्थितिः ॥ २१६ ॥§ 4898

...umbered कदापि नोभयभ्रंशस्तथाप्येकैकसंस्थितिः ।
कदाप्येकतयानेकतया भाति कदापि तत् ॥ २१७ ॥§ 4900

...umbered तथापि भाव एकस्यामसिद्धिर्व्यापकच्युतेः ॥ २१८ ॥§ 4901

फलाङ्गभावः परवित् परिहारात्तु न द्विधा ॥ २३१ ॥§ 4927

...umbered तस्माद् यथा परज्ञानं तथा हेतुफलस्थितिः ।
यथा स्ववित्तिविश्रामस्तथा संवृतिसत्यसौ ॥ २३२ ॥§ 4929

...umbered चित्तमात्रव्यवस्थानमनुत्पादं वदन्त्यतः ।
प्रतीत्योत्पन्नताप्यस्मादसिद्धेरप्यसाधनम् ॥ २३३ ॥§ 4931

...umbered न च प्रतीत्योत्पन्नत्वमेव वाच्या च शून्यता ।
अधरस्थितियुग्माच्च नैवं भेदो वृथा श्रमः ॥ २३४ ॥§ 4933

578 ...umbered अनुत्पन्नत्वमेवास्तु हेतुर्न प्राच्यदूषणात् ।
हानेऽपि हेतुफलयोः स्फुरद्रूपं क्व गच्छतु ॥ २३५ ॥§ 4935

...umbered तस्माद्धर्मः कल्पितैरेव रूपैः शून्यः सर्वो भासभाग्नैव कश्चित् ।
चित्राद्वैतं चित्रचक्रं तदेतद् भाव्यं भाव्यैरप्रपञ्चं शिवाय ॥ २३६
॥§ 4937

...umbered साक्षात्कारो न कामं भवति भवभृतां यावदस्या दशाया
हेयोपादेयसाध्यप्रभवपरिचयस्तावदस्त्यप्रकम्पः ।
तस्मात् संभारयुग्माभ्यसनपरिणतौ मूर्तिचेतोगुणाभ्यां योगी
योगीश्वरोऽसौ निरुपमनिलये लब्धबोधिः प्रसिद्धः ॥ २३७
॥§ 4939

...umbered यथा सुवर्णं गुणरूपसंपदः प्रकर्षपर्यन्तमुपेतमक्षयम् ।
विमुक्तमालीक्यकलङ्कशङ्कया तथैव बोद्धं वपुरस्तु देहिनाम् ॥
२३८ ॥§ 4941

॥ इति चित्राद्वैतनिर्णयश्चतुर्थः परिच्छेदः ॥

॥ साकारसंग्रहसूत्रं समाप्तमिति ॥
॥ कृतिरियं महापण्डिताचार्यज्ञानश्रीमित्रपादानाम् ॥

| | |
|---|---|
| ग्रन्थभागे | |
| १७, १९, २१, २३ -शीर्षकेषु | ३१२ |
| ०ध्यायेऽन्वयाधि० | |
| २६ | दिग्नागस्य प्रमाणसमुच्चये |
| ४७ | ६ |
| तिलकचित्रक० | ३१५ |
| १० | व्यस्तो हेतोरनाश्रयः । |
| ८० | ६ |
| स्वरूपसाक्षात्क० | प्र. वा. ४. ९१ |
| ८९ | अन्तिमपं० रत्न० निब० ८१, ८८ |
| ३१६ | ९-१० |
| मध्ये प्र. वा. १. १८ | |
| ९४ | ५ |
| द्रः श्लो. वा. पृः २९९ | ३२७ |
| २४ | तादृशदशाविशेषस्य |
| १०६ | १ |
| व्याप्यव्यापकभावौ | ३५९ |
| १९ | अलीकमन्यत्वेऽपीदं व्या० |
| ११३ | ३ |
| चेदित्युक्तम् । तत्र | ३६३ |
| १२ | शक्त्यभावान्न |
| १३७ | १६ |
| ग्राह्याध्यवसेय० | ३६४ |
| २४ | प्रकाशमानत्वमबाध० |
| १४४ | ८ |
| सोऽयं नयः | ३६५ |
| ७ | नासत्प्रकाशवपुषा |
| १६५ | १६ |
| ०दर्शनमौत्तर० | १५ |
| ०नुरोधे न प्रासङ्गिकं | |
| १६९ | २२ |
| च स्थितिः ॥ | ३७१ |
| २५ | नीलस्वभावभिदुर० |
| कार्यकारणभावसिद्धौ | ३७२ |
| १ | न नीलस्य प्रकाशश्चेत् |
| १८४ | २ |
| कवलयितुर्नेह | साहसं किमतः परम् । |
| १९१ | ४ |
| एकज्ञानासं० | ३८६ |
| ४ | चेतोनिराकृति० |
| १९२ | ४ |
| प्राक् न पश्चा० | ३८९ |
| १७ | नागार्जुनस्य |
| २०८ | १८ |
| दृष्टाविवेति | ४०३ |
| २२ | प्रतिपातिना |
| प्रमाणविनिश्चये | ४४४ |
| १२ | तथतारम्बने |
| २२६ | १९ |
| शालित्वादिस्थितेः | ४०५ |
| २ | विगमं याति |